# विश्वनाथकृतमुक्तावलीटीकायाः शब्दखण्डे दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा ।

यादवपुरविश्वविद्यालयस्य कलाविभागस्य संस्कृतविषये
'एम्.फिल्.' उपाधिप्राप्तये उपस्थापितो गवेषणनिबन्धोऽयम् ।


**गवेषकः** **: जगदीश रायः**

क्रमिकसंख्या : 001701203015
परीक्षा-क्रमाङ्कः : MPSA194013
शिक्षावर्षः : 2017-2019
निबन्धीकरण-संख्या : 106633 वर्षम् 2008-09

तत्त्वावधायकाः
**अध्यापकाः ड: तपनशङ्कर भट्टाचार्य्याः**
संस्कृत विभागः, यादवपुर विश्वविद्यालयः

संस्कृत-विभागः(कला)
**यादवपुर विश्वविद्यालयः**
कलकाता- 700032

2019

Certified that the thesis entitled, "विश्वनाथकृतमुक्तावलीटीकायाः शब्दखण्डे दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा" submitted by me towards the partial fulfilment of the degree of Master of Philosophy (Arts) in **Sanskrit** of Jadavpur University, is based upon my own original work and there is no plagiarism. This is also to certify that the work has not been submitted by me in part or in whole for the award of any other degree/diploma of the same institution where the work is being carried out, or to any other institution. A paper out of this dissertation has also been presented by me at a seminar at **Jadavpur University**, thereby fulfilling the criteria for submission, as per the M.Phil Regulation (2017) of Jadavpur University

---------------------------------------------------

**Name – JAGADISH ROY** (M.Phil Student)

Roll. No. 001701203015

Exam. Roll No. - MPSA194013

Reg. No. - 106633 of Year 2008-09

On the basis of academic merit satisfying all the criteria declared above the dissertation work of **Jagadish Roy** entitled ``विश्वनाथकृतमुक्तावलीटीकायाः शब्दखण्डे दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा" is now ready for submission towards the partial fulfilling of the Degree of Master of Philosophy (Arts) in **Sanskrit** of Jadavpur University.

------------------------ ----------------------------------- ---------------------------

Head (Department of Sanskrit)

Supervisor & convener of RAC

Member of RAC

# *विषयानुक्रमणिका*

| | | |
|---|---|---|
| **आमुखम्** | | 1 - 4 |
| **प्रथमाध्यायः** | विश्वनाथः तेषां कृतित्वेषु भाषापरिच्छेदश्च | 5 - 9 |
| **द्वितीयाध्यायः** | दिनकरभट्टस्य कृष्णवल्लभाचार्यस्य च परिचयः | 10 - 12 |
| **तृतीयाध्यायः** | भाषापरिच्छेदे शब्दप्रमाणम् | 13 - 35 |
| **चतुर्थाध्यायः** | दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा | 36 - 86 |
| **उपसंहारः** | | 87 - 88 |
| **विमर्श-ग्रन्थपञ्जी** | | 89 - 91 |

******

# आमुखम्

मुक्तिरेव भारतीयदर्शनानां परमं लक्ष्यम्। मुक्तिः इत्युक्ते आत्मनो मुक्तिः। भारतीयदर्शनेषु अयं मुक्तिः 'मोक्षः' 'कैवल्यम्' 'अपवर्गः' 'निर्वाणम्' 'निःश्रेयसः' इत्यादि नाम्ना अभिधीयते। 'तत्त्वज्ञानम्' एव जीवानां मुक्तेः कारणम् इति सर्वदर्शनानि स्वीक्रियन्ते। अस्य तत्त्वज्ञानस्य अभावेन एव मनुष्यानाम् आत्मनो मुक्तिः कदापि न अभवत्, नैव वा भविष्यति। सद्वस्तु यथायथरूपेण सत्, असद्वस्तु यथायथरूपेण असद् इत्याकारकं ज्ञानम् एव तत्त्वम्।[१] इत्युक्ते यः पदार्थो यद्धर्मविशिष्टः सः पदार्थः तद्धर्मरूपेण ज्ञायमानो भवति चेत् सः पदार्थः एव तत्त्वम्। तत्त्वमिदम् एकैकस्मिन् दर्शने एकैकप्रकारकम्। यथा, आस्तिकदर्शनेषु प्राचीनतमे सांख्यदर्शने मूलतत्त्वं **द्विविधं**, प्रकृतिः पुरुषश्च। प्रकृतिपुरुषयोः तत्त्वज्ञानेनैव मुक्तिः भवति। सांख्यदर्शनस्यानुसारियोगदर्शनेऽपि तत्त्वं द्विविधम्। परन्तु योगदर्शनम् ईश्वरं स्वीकरोति। अतः तत्र ईश्वरोऽपि एकं तत्त्वम्। इत्युक्ते योगदर्शने तत्त्वं **त्रिविधम्**। पुनश्च गौतमप्रणीत-न्यायदर्शने तत्त्वम् **षोडश**। प्रमाणादिषोडश पदार्थाः अत्र तत्त्वम्। समानतन्त्र-वैशेषिकदर्शने तत्त्वं **सप्त**। द्रव्यादिसप्त पदार्थाः एव तत्त्वम्। वेदस्य कर्मकाण्डस्य अनुसारि-मीमांसादर्शने तत्त्वम् **एकमे**व, तत्तु यज्ञः। वेदस्य ज्ञानकाण्डस्य अनुसारिवेदान्तदर्शने तत्त्वं पुनः **एकमे**व, तत्तु आत्मा।

एवं नास्तिकदर्शनानामपि भिन्नप्रकारकं तत्त्वं वर्तते। यथा, चार्वाकदर्शने प्रत्यक्षप्रमाणेन प्रमाणितं वस्तु एव तत्त्वम्। तदतिरिक्तं किमपि तत्त्वं नास्ति। वौद्धदर्शने मुक्तेः उपायस्वरूपं तत्त्वं **चतुर्विधम्**, तत्तु चत्वारि आर्यसत्यानि[२]। पुनश्च जैनदर्शनस्य मुक्तेः उपायस्वरूपं तत्त्वं **त्रिविधम्**, तत्तु त्रिरत्नम्[३]। तर्हि दृश्यते यत्, भारतीयदर्शनेषु तत्त्वानां विविधता वर्तते। एतेषु तत्त्वेषु कस्यापि एकदर्शनस्य तत्त्वं तत्त्वानि वा अनुसृत्य जीवस्य मुक्तिः भवितुं शक्यते।

एतेषु न्यायदर्शनस्य 'प्रमाणप्रमेयादीनि' यानि षोडष तत्त्वानि सन्ति, एतेषां षोडशतत्त्वानां सम्यग् ज्ञानार्जनेन जनैः कस्यापि ज्ञानस्य निश्चितसिद्धान्तं नेतुं शक्यते, अर्जितज्ञानस्य पुनः

---

१. " सतश्च सद्भावोऽसतश्चासद्भावः। सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति।" *न्यायदर्शनम्*, सम्पा. फणिभूषणतर्कवागीशः, पृ- १४

२. *भारतीयदर्शनम्*, सम्पा. समरेन्द्र चन्द्र भाट्टाचार्यः, पृ- ४४

३. तदेव

आलोचनं कर्तुं शक्यते, यथार्थयुक्ति-तर्कं कर्तुं शक्यते, ज्ञानार्जनस्य यथार्थप्रक्रिया अवगम्यते, सर्वोपरि मनुष्यानां मोक्षप्राप्तिः भवति इत्यादि । अतः तानि षोडष तत्त्वानि महत्त्वपूर्णानि, सकलविद्यानां प्रदीपस्वरूपाणि, सकलकर्माणामुपायस्वरूपाणि, सकलधर्मानामाश्रय-स्वरूपाणि च सन्ति ।[४] अतः मनुष्यानाम् एतेषां तत्त्वानां ज्ञानम् अर्जनीयम् । एतेषां तत्त्वानां ज्ञानार्जनाय न्यायदर्शनस्य विविधाः ग्रन्थाः विरचिताः उपलभ्यन्ते । तेषु महर्षेः गौतमस्य *'न्यायसूत्रम्'* न्यायदर्शनस्य मूलग्रन्थः । मूलग्रन्थस्य उपरि बहुकालात्परं अनेके भाष्यग्रन्थाः, टीकाग्रन्थाः, वार्त्तिकग्रन्थाः च इत्यादि विरचितम् । तेषु वात्सायनस्य *'न्यायसूत्रभाष्यम्'*, उद्द्योतकरस्य *'न्यायवार्त्तिकम्'*, वाचस्पतिमिश्रस्य *'न्यायवार्त्तिक-तात्पर्यटीका'*, *उदयनाचार्यस्य 'न्यायवार्त्तिक-तात्पर्य-परिशुद्धिः'* इत्यादि प्रधानम् । अनन्तरं सूत्र-भाष्य-टीकादिग्रन्थात्परं न्यायदर्शनस्य तत्त्वावगमने अनेके कारिकाग्रन्थाः, प्रबन्धग्रन्थाः इत्यादि विरचितम् । तेषु न्याय-वैशेषिकदार्शनिक-विश्वनाथपञ्चाननस्य *न्यायसूत्रवृत्तिः, कारिकावली, सिद्धान्त-मुक्तावली,* च, शंकरमिश्रस्य *तर्कभाषा, अन्नंभट्टस्य तर्कसंग्रहः, तर्कसंग्रहदीपिका* च, वरदराजस्य *तार्किकरक्षा* इत्यादि । एतेषु विश्वनाथन्यायपञ्चाननस्य कारिकावली सिद्धान्तमुक्तावली च एकत्र '***भाषापरिच्छेदः***' विशिष्टग्रन्थः । अस्य ग्रन्थस्य उपरि अपि बहवः टीकाग्रन्थाः वर्तन्ते । यथा, दिनकरभट्टस्य ***दिनकरी***टीका, द्राविडनृसिंहशास्त्री-विरचितप्राचीन***प्रभा***, पट्टाभिरामशास्त्रीविरचित***मञ्जूषा,*** सूर्यनारायणशुक्लरचित***मयूख***टीका, छज्जूरामशास्त्री-कृत***मूलचन्द्रिका***, मुकुन्दशर्मसंकलिता-***ऽभिनवप्रभा***, श्रीकृष्णवल्लभाचार्य-कृत***किरणावली***टीका इत्यादि ।

उपरि उल्लिखितग्रन्थेषु '**विश्वनाथकृतमुक्तावलीटीकायाः शब्दखण्डे दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा**' इति मम अस्य गवेषणपत्रस्य विषयः । पत्रेऽस्मिन् प्रधानतः चत्वारः अध्यायाः सन्ति । प्रथमाध्याये विश्वनाथः तेषां कृतित्वेषु भाषापरिच्छेदः इति आलोच्यते । द्वितीयाध्याये दिनकरभट्टस्य कृष्णवल्लभाचार्यस्य च परिचयः दीयते । तृतीयाध्याये भाषापरिच्छेदग्रन्थे वर्णितं शब्दप्रमाणम् सरलभाषया

---

४ ."प्रदीपः सर्वविद्यानामुपायः सर्वकर्माणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥ अर्थशास्त्रम्, सम्पा. अनिल चन्द्र वसु, पृ-१

आलोच्यते। चतुर्थाध्याये मूलकार्यम् इत्युक्ते दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा क्रियते।

इदानीम् चतुर्थाध्याये मूलकार्यम् इत्युक्ते दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा इति विषये किञ्चित् वदनीयम्। तत्र कारिकां मुक्तावलीटीकां च अग्रे संस्थाप्य टीकाद्वयस्य तुलना क्रियते। अर्थात् **मूलग्रन्थं पूर्वे संस्थाप्य तस्य मूलग्रन्थस्य अवबोधने टीकाद्वयस्य किं किं विश्लेषणं व्याख्यानं वा महत्वपूर्णं तत् तुल्यते।** तत्र पादटीकायां किञ्चिद् अवधानं देयं यत्, पादटीकायां दिनकरीटीकायाः किरणावलीटीकायाः च नाम वारं वारम् उल्लिख्यते। तत्र **'दिनकरी'** इत्युक्ते " ***कारिकावली*** **(न्यायमुक्तावलीसंवलिता दिनकरी-रामरुद्रीसहिता), सम्पा. आत्माराम नारायण जेरे, नव देहली: राष्ट्रीय संस्कृत संस्थान,** २००२" इति पुस्तकस्य अवबोधनं क्रियते। पुनः **'किरणावली'** इत्युक्ते **"*न्यायसिद्धान्तमुक्तावली*** **(किरणावली टीकासहिता), व्याख्याकार प० श्रीकृष्णवल्लभाचार्य, वाराणसी-१:चौखम्बा संस्कृत सीरीज आफिस,** २०२८ (**वि० संवत्, द्वितीय संस्करण**)" इति पुस्तकस्य अवबोधनं क्रियते। अपि च तृतीयाध्याये पादटीकायाम् उल्लिखित-भाषापरिच्छेदग्रन्थः (मुक्तावलीसहितः) इत्युक्ते "***भाषापरिच्छेद,*** **सम्पा. अनामिका राय चौधुरी, कलकाता: संस्कृत पुस्तक भाण्डार,**१४२१(बङ्गाब्द)" इत्यस्य अवबोधनं क्रियते।

भाषापरिच्छेदे शब्दप्रमाणविषये याः कारिकाः वर्तन्ते ताः यद्यपि सरलाः परन्तु तासामुपरि मुक्तावलीटीका कदापि कठिना वर्तते। अतः टीकाग्रन्थानाम् आवश्यकता विद्यते। पत्रेऽस्मिन् ययोः टीकाग्रन्थयोः तुलना क्रियते तयोः किरणावलीटीका अर्वाचीना, दिनकरीटीका च प्राचीना। द्वयोः टीकयोः पूर्वापरविषये मुख्यप्रमाणं वर्तते किरणावलीटीकायाः भूमिकांशः। तत्र श्रीकृष्णबल्लभाचार्येण उल्लिखितं यत्, *"-------- अयं च निबन्धः प्रसिद्धरामरुद्रीसहित-दिनकरीय, -द्राविडनृसिंहशास्त्रिरचितप्राचीनप्रभा ----- तदन्यटिप्पण्यादिभिः सनाथीकृतोऽपि मदीयविस्तृतकिरणावलीसमुल्लसितो विशिष्टमुपकारकं जनयिष्यतीति ------"* इति [५]। किरणावलीटीकायां कारिकानां मुक्तावल्याः च विस्तृतव्याख्या क्रियते, अपरस्यां

५. न्यायसिद्धान्तमुक्तावली(किरणावलीसहिता), व्याख्याकारः, प० श्रीकृष्णवल्लभाचार्यः, पृ ६(भूमिका)।

दिनकरीटीकायां प्रयोजनानुसारम् आलोचनं क्रियते । तत्र विस्तृतव्याख्या नास्ति । एतयोः टीकयोः तुलनात्मकसमीक्षया शब्दप्रमाणावगमने विद्यार्थिनः लाभान्विताः भविष्यन्ति इति मन्ये।

मम अस्मिन् गवेषणाकार्ये विशेषरूपेण ये यहायताः कृतवन्तः ते यादवपुरविश्वविद्यालयस्य संस्कृतविभागस्य अध्यापकाः न्याय-वैशेषिक-काव्य-व्याकरण-मीमांसादिप्राच्यविद्यानां प्रतीच्यविद्यानां च निष्णाताः मदीयाः परमपूजनीयाः डः तपनशङ्करमहाभागाः । ते एव मम गवेषणाकार्यस्य तत्त्वावधायकाः । तेषाम् अमृतमयसदुपदेशेन मम इदं गवेषणापत्रम् । अहं ऐकान्तिकभक्तिपुरःसरं तेषां श्रीचरणकमलौ कोटि कोटि नमस्करोमि।

अन्तिमे एषा प्रार्थना यत्, मम इमं लघुनिबन्धं क्षमाशीलसहृदयविद्वद्जनानां निकटे उपस्थाप्यते । आशास्महे यत्, ते सहृददृष्ट्या मां शुभाशीर्वादप्रदानेन कृतार्थं करिष्यन्ति इति।

यादवपुरविश्वविद्यालयः

विद्वद्वर्यगणस्य एकान्तानुगतः

जगदीश रायः

# प्रथमाध्यायः


## विश्वनाथः तेषां कृतित्वेषु भाषापरिच्छेदश्च

न्यायदर्शनस्य प्रथमपाठार्थिनां कृते यानि पुस्तकानि सन्ति तेषु ‘भाषापरिच्छेदः’ अन्यतमम् । गौतमन्यायसूत्रस्य कणादवैशेषिकसूत्रस्य मेलबन्धनेन प्रणीतः अयं ग्रन्थः नव्य-न्यायानुशीलनस्य प्रथमं प्रधानं च अवलम्बनरूपेण स्वीकृतम् ।

“अस्य ग्रन्थस्य रचयिता कः ? विश्वनाथन्यायपञ्चाननः कृष्णदास सार्व्वभौमः वा इत्यस्मिन् विषये मतान्तरं वर्तते । विभिन्नस्थानेषु भाषापरिच्छेदग्रन्थस्य या मातृकाः प्राप्यन्ते तत्र पुष्पिकायां कुत्रापि ग्रन्थाकारः विश्वानाथः, कुत्रापि वा कृष्णदास सार्वभौमः इति उल्लिख्यते । ग्रन्थारम्भे श्लोके कुत्रापि लिखितं वर्तते ‘विष्णोर्वक्षसि विश्वनाथकृतिना’ अपि च कुत्रापि लिखितं वर्तते ‘विष्णोर्वक्षसि कृष्णदासकृतिना’ इति । कासाञ्चन मातृकायां विश्वनाथः कृष्णदासरूपेण संशोधितं क्रियते, एवं च कुत्रापि कृषणादासः विश्वनाथरूपेण संशोधितं क्रियते । महामहोपध्याय-हरप्रसादशास्त्रिणः मतानुसारेण कृष्णदासस्य ग्रन्थकृतित्त्वं प्रमादेन उल्लिखितम् इति । विद्यानिवास-भट्टाचार्यस्य पुत्रः विश्वनाथपञ्चाननः एव प्रकृतो ग्रन्थकारः । पण्डितराजेन्द्रशास्त्रिणः मतानुसारमपि भाषापरिच्छेदस्य ग्रन्थकारो विश्वनाथः एव । नव्यन्यायस्य विख्यातो गवेषकः डः दीनेश चन्द्र भट्टाचार्यः तस्य विख्यातः ग्रन्थः ‘वाङ्गालीर सारस्वत अवदान’ इति ग्रन्थस्य प्रथमभागे( पृ ११७-१२०) अत्यन्तनिपुणरूपेण तथ्यसहयोगेन विचारविमर्शेण च उल्लिख्यते यत् भाषापरिच्छेदग्रन्थः कृष्णादासस्य एव । तस्य मतं खण्डनार्थं किमपि विपरीतमतमपि नास्ति । परन्तु दुःखस्य विषयो यत्, अध्यापक-भट्टाचार्यस्य मतम् उपेक्ष्य अद्यावधि मुद्रितपुस्तके गतानुगतिकधारारूपेण भाषापरिच्छेदस्य ग्रन्थकारो विश्वनाथपञ्चाननः इत्येव प्रचलति ।”[१] श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यस्य वंशपरिचयः

१. भाषापरिच्छेदः(मुक्तावली), सम्पा. अनामिका राय चौधुरी, इति ग्रन्थस्य उपस्थापनांशात् भाषापरिच्छेदस्य ग्रन्थाकारः विश्वनाथः इति निर्णीयते ।

निम्नप्रकारः[२] -




'भाषापरिच्छेद'ग्रन्थस्य प्रतिखण्डस्य समाप्तौ तेन आत्मानं महामहोपाध्याय विद्यानिवास-भट्टाचार्यस्य पुत्ररूपेण उल्लिख्यते।

विश्वनाथकृतन्यायसूत्रवृत्तेः अन्तिमे लिखितं वर्तते - *"रसवाणतिथौ शकेन्द्रकाले बहुले कामतिथौ शुचौ सिताहे"* । इत्यस्माद् अवगम्यते यत्, विश्वनाथस्य जन्म १५५६ शकाब्दे (1634 A.D) अभवत्।

एतैः महाभागैः ने केवलं 'भाषापरिच्छेदो' ग्रन्थो विरचितः । अन्ये अनेके ग्रन्थाः[३] एतैः विरचिताः। ते यथा, १. *गौतमसूत्रवृत्तिः* (गौतमप्रणीतन्यायसूत्रस्य व्याख्या ) २. *न्यायालोकः* ३. *आख्यातवादटीका* ४. *नञ्वादटीका* ५. *पदार्थतत्त्वालोकः* ६.न्यायतन्त्रबोधिनी।

२. भाषापरिच्छेदः सम्पा. श्रीमत्-पञ्चानन-भट्टाचार्य-शास्त्री, भूमिकाशतः विश्वनाथमहाभागानां वंशपरिचयः अत्र दीयते।

३. संस्कृत साहित्येर इतिहस, सम्पा. धीरेन्द्रनाथ वन्द्योपाध्यायः, पृ ५३३

***भाषापरिच्छेदग्रन्थः***

१६८ कारिकाः तदुपरि मुक्तावलीटीका एकत्र 'भाषापरिच्छेदः' इति नाम्ना प्रचलितः वर्तते। ग्रन्थेऽस्मिन् प्रत्यक्ष-खण्डम्, अनुमान-खण्डम्, उपमान-खण्डं, शब्द-खण्डं, गुण-खण्डम् च विद्यन्ते।

- **प्रत्यक्ष-खण्डम्**

"नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥
इति मङ्गलाचरणेन प्रारभमाने खण्डेऽस्मिन् वैशेषिकसम्मतसप्तपदार्थानां द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावानां परिचयः (प्रमेयतत्वम्) दीयते। तत्र कारिका वर्तते-

"द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाभावाः पदार्थाः सप्त कीर्तिताः॥" इति।

अत्र शक्तिः सादृश्यं च इत्येतयोः पदार्थत्वं निराक्रियते।
द्रव्यादिसप्तपदार्थानां लक्षणं, विभागः, तेषां साधर्म्यवैधर्म्यनिरूपणम् च अलोच्यन्ते। अनन्तरं कार्यकारणतत्त्वम्, कारणस्य लक्षणं, तेषां विभागाः पञ्चान्यथासिद्धिः इत्यादेः निरूपणं क्रियते।
पृथिव्यादि-नवद्रव्येषु पृथिव्याद्यष्टद्रव्यानां लक्षणविभागादिनिरूपणात्परम् आत्मनो विशेषो गुणो बुद्धिः इत्यस्य व्याख्यानकाले चतुर्विधप्रमाणस्य आलोचना अस्मिन् खण्डे क्रियते।

- **अनुमान-खण्डम्**

अनुमानखण्डे अनुमानप्रमाणं सविस्तारेण अत्र आलोच्यते
तत्र अनुमितेः उत्पत्तिप्रक्रिया, ज्ञायमानलिङ्गस्य करणत्वखण्डनं, परामर्शस्य लक्षणविचारः, परामर्शस्य प्रयोजनविचारः, व्याप्तिः, पक्षताविश्लेषणं, पञ्च हेत्वाभासाः आलोच्यन्ते।

अनुमानप्रमाणविषये कारिका अत्र क्रियते –
" व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥
अनुमायां, ज्ञायमानं लिङ्गन्तु करणं न हि।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ इति।
अत्र लक्षणीयं यत्, पञ्चावयवात्मकपरार्थानुमानस्य आलोचना अत्र न क्रियते।

- **उपमान-खण्डम्,**

अस्मिन् खण्डे उपमानप्रमाणस्य लक्षणम्, उपमानप्रमाणस्य व्यापारः कार्यनिरूपणं च आलोच्यते । उपमानप्रमाणविषये ग्रन्थकारेण अधिकं न आलोचितम् । अत्र उपमानप्रमाण-विषये कारिका क्रियते-

"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदानान्तु शक्तिधीरूपमाफलम् ॥" इति।

- **शब्द-खण्डम्**

शब्दखण्डे शाब्दबोधप्रक्रिया आलोच्यते । प्रसङ्गेऽस्मिन् शाब्दबोधस्य करणत्वं, वृत्तिः, शक्तिः, शक्तिग्रहस्य उपायाः, शक्तेराश्रयः, पदम्, पदविभागः, लक्षणा, आसत्ति, योग्यता, आकङ्क्षा, तात्पर्यम् इत्यादि आलोच्यते। शब्दप्रमाणविषये अत्र कारिका वर्तते-

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधं फलं तत्र शक्तिधीः सहकारिणी ॥" इति

खण्डस्यास्य अन्तिमे स्मृतिनिरूपणं मनोनिरूपणं च क्रियते।

## ■ गुण-खण्डम्

अस्मिन् खण्डे चतुर्विंशतिगुणाः आलोच्यन्ते । तेषां लक्षणानि, विभागः इत्यादि । मीमांसामतस्य खण्डनपूर्वकं प्रामाण्यवादः अत्र आलोच्यते । अस्य खण्डस्य अन्तिमे शब्दस्य विभागनिरूपणं, शब्दस्यानित्यत्वस्थापनं च आलोच्येते ।

******

# द्वितीयाध्यायः

## दिनकरभट्टस्य कृष्णवल्लभाचार्यस्य च परिचयः

- **दिनकरभट्टस्य परिचयः**

अस्मिन् अध्याये मया दिनकरभट्टस्य कृष्णवल्लभाचार्यस्य परिचयं प्रदातुं प्रयासः क्रियते । दिनकरभट्टस्य विषये अधिकं तथ्यं मया न प्राप्तम् । बहुप्रयासं कृतं परन्तु तादृशं पूर्णतथ्यं किमपि न प्राप्तम् । तथ्यसंग्रहार्थं मया कलकातास्थित-संस्कृत-साहित्य-परिषद्, एशियाटिक सोसाइटी, यादवपुरविश्वविद्यालयस्य केन्दीयपुस्तकालयः, विभागीयपुस्तकालयः इत्यादिबहुत्र गतम् । परन्तु तादृशं पूर्णतथ्यं न प्राप्तम् । दिनकरभट्टस्य विषये केवलं निम्नप्रदत्तपरिचयेन वयं परितुष्टाः भवामः ।

“मुक्तावली चेयं तत्त्वचिन्तामण्यादृतया नवीनया विचारशैल्या पदार्थान् प्रतिपादयन्ती व्याख्यानमन्तरेण नैव मन्दमतीनामन्तेवादिनां तादृगुपकारायेति विचार्य भारद्वाजकुलाम्बुधिपूर्णचन्द्रो बालकृष्णभट्टात्मजः श्रीमान् महादेवभट्टः तां व्याख्यातुमारेभे । परन्तु नानेन सा संपूर्णतया व्याख्याता । किंतु शब्दखण्डान्तरमेवेति तावत्पर्यन्तमेवोपलब्धया रामरुद्र्या वाराणस्यां प्रचलितया तादृश्या किंवदन्त्या चावगम्यते । मनोनिरूपणमारभ्याऽऽसमाप्ति पुनरस्या व्याख्यानं महादेवभट्टात्मजो दिनकरभट्ट एव स्वपित्राज्ञानुसारेण चकारेति “भानुं प्रणम्य परिभाव्य च शास्त्रसारं मुक्तावलीकिरण एव पितृप्रदिष्टः । सद्युक्तिभिर्दिनकरेण करेण सोऽयं नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु” इति ग्रन्थान्ते परिदृश्यमानश्लोकात् “इति श्रीमहादेवभट्टतनुजदिनकरभट्टविरचिते” इतिवाक्याच्चावगन्यते । अतो “दिनकरभट्टो दिनकरीं प्रणिनाय । अस्य पिता बालकृष्णभट्टः’ इति केषाञ्चिद्वाक्यमाद्यन्तश्लोकानालोचनमूलकभान्तिजन्यमेवेति प्रतिभाति”[१] इति ।

---

१. कारिकावली (न्यायसिद्धान्तमुक्तावलीसम्बलिता, दिनकरी-रामरुद्री सहिता), सम्पा. आत्माराम जेरे, भूमिकांशतः दिनकरभट्टस्य विषये प्राप्तं तथ्यम् अत्र दियते । तदधिकं तथ्यं मया न प्राप्तम् । अतः क्षमाप्रार्थ्यहम् ।

## ● कृष्णवल्लभाचार्यस्य परिचयः

यदा कस्यापि देशस्य पूर्वसञ्चितपुण्यपुञ्जं प्रतिस्पन्दितं भवितुम् आरभते तदा तत्र, विद्या-शौर्य-चारित्र-ज्ञान-धर्म-सुसंस्काराणाम् असामान्य-वैभवं नीत्वा ईदृशो महापुरुषः अवतरति। ये स्वस्य निष्कलुष-चरित्रेण, अलौकिक-प्रतिभया, अनन्तज्ञान-गरिम्ना स्वस्य देशस्य समाजस्य च सदा मङ्गलं कुर्वन्ति। तादृशाः महापुरुषाः सन्ति श्रीकृष्णवल्लभाचार्यः।

स्वामीनारायण-संप्रदायस्य दिग्गज-विद्वान् स्वामी श्रीकृष्णवल्लभाचार्यः तादृशेषु विद्वत्सु एकः विद्वान् येन न केवलं भारतीयदर्शनेषु अपितु भारतीयव्याकरण-काव्य-पुराण-धर्मशास्त्रादीनां अविरतं मननं कृत्वा अतिविद्वत्तापूर्णग्रन्थानां निर्माणं कृत्वा च संस्कृतभाषा गौरवान्विता कृता।

### *कृष्णवल्लभाचार्यस्य संक्षिप्तपरिचयः*

१. नाम – स्वामी कृष्णवल्लभाचार्यः

२. वासस्थानम्- स्वामी-नारायण-मन्दिरम्, जुनागडः, गुजरात-राज्यम्, भारतम्।

३. स्वामिनां वयः – ७५ वर्षाणि।

४. शैक्षणिक-योग्यता – महामहोपाध्यायः, वैष्णवविद्वत्सार्वभौमः, दार्शनिकपञ्चानन, षडदर्शनाचार्यः, नव्यन्यायाचार्यः, सांख्य-योग-वेदान्त-मीमांसातीर्थः, काव्यकुशलः, साहित्यमनीषी,
M.A., D.Litt. D.Phit. Ph.D.

५. कार्यपरिचयः- प्रायः ५५ ग्रन्थाः १६७६ पर्यन्तं प्रकाशिताः

६. स्वामिनां बहुचर्चितग्रन्थाः- न्यायसिद्धान्तमुक्तावल्याः किरणावलीटीका,
तर्कसंग्रहदीपिकायाः किरणावली
सांख्यतत्त्वकौमद्याः किरणावली

योगसूत्रभोजवृत्तेः किरणम् तत्त्वप्रभावली
ख्यातिविमर्शः
कविकाव्यगौरम्
श्रीस्वामिनारायणदर्शनम् इत्यादि

७. लक्ष्मीनारायणसंहिता (श्वेतायनसंहिता) १२६००० श्लोकसमन्विता श्लोकानां संख्याविचारेण एषा महाभारतादपि वृहती। अष्टवर्षाभ्यन्तरेण स्वामिकृष्णवल्लभाचारैः एषा पञ्चभागेषु रचिता। भारतीयदर्शनं,तत्त्वज्ञानं, चिन्तनं, मननं, अध्ययनं, तर्कः, वेदः, न्यायः, सांख्यः, योगः, उपनिषद्, भारतीयसंस्कृतिः इत्यादिविषयानां गुणसम्पन्ना एषा संहिता। ५००० वर्षेभ्यः प्रथमवारम् ईदृशं महाकाव्यमेकं प्रकाशितम्। *

********

* "*अभिनन्दग्रन्थ-श्रीकृष्णवल्लभाचार्यमहारज*" इति ग्रन्थात् श्रीकृष्णवल्लभाचार्यस्य परिचयः दीयते। श्रीकृष्णवल्लभाचार्यस्य विषये इतोऽपि अधिकं ज्ञानार्थम् अस्य ग्रन्थस्य उपयोगं कर्तुं पाठकान् प्रति निवेदयामि।

# तृतीयाध्यायः

## भाषापरिच्छेदे शब्दप्रमाणम्

अस्मिन्नध्याये भाषापरिच्छेदग्रन्थे यत् शब्दप्रमाणं व्याख्यायते, तस्य उपस्थापनं अत्र सरलभाषया क्रियते। भाषापरिच्छेदग्रन्थे नव्यन्यायानुसारि-विश्वनाथन्याय-पञ्चाननेन स्वकीयग्रन्थे शब्दप्रमाणविषये उक्तम्-

*पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।*
*शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥*[१]

अर्थात् शाब्दबोधरूपफलस्य बहुविधानि कारणानि सन्ति। शाब्दबोधफलस्य करणं पदज्ञानं, व्यापारः पदजन्यपदार्थस्मरणं शक्तिज्ञानं तस्य सहकारिकारणञ्च। इत्युक्ते पदज्ञानं करणरूपेण, पदजन्यपदार्थस्मरणं व्यापाररूपेण एवञ्च शक्तिज्ञानं सहकारिकारणरूपेण यद् ज्ञानमुपद्यते स एव शाब्दवोधः इति। मुक्तावल्याम् उच्यते – *'ज्ञायमानपदं न तु शाब्दबोधस्य करणम्'*, पदज्ञानमेव शाब्दबोधस्य करणम्। यतो हि पदस्य अभावेऽपि मौनश्लोकादिभिः अस्माकं शाब्दबोधो भवति। पदश्रवणाद् अनन्तरमेव पदार्थस्य स्मरणं भवति। ईदृशं पदार्थस्मरणं पदजन्यपदार्थस्य उपस्थितिः उच्यते। पदार्थस्य ईदृशा उपस्थितिः एव शाब्दबोधस्य व्यापारः। अतः उक्तं मुक्तावल्यां- *'पदजन्यपदार्थज्ञानं व्यापारः'* इति। अर्थात् केवलं पदज्ञानात् पदार्थज्ञानमेव व्यापारः, अन्योपायेन गृहीतं पदार्थज्ञानं न व्यापारः इति। अन्यथा पदज्ञानं यस्य जनस्य अस्ति तादृशजनस्य प्रत्यक्षादिप्रमाणजन्यपदार्थस्य उपस्थितौ अपि शाब्दबोधस्य आपत्तिः भवति। इतोऽपि व्यापारविषये अत्र ध्यातव्यं यत्, पदजन्यपदार्थज्ञानं वृत्तिज्ञानेन स्यात्। इत्युक्ते वृत्तिसम्बन्धेन एव पदजन्यपदार्थज्ञानं व्यापारः भवेत्। अन्यथा पदजन्यपदार्थज्ञानं यदि वृत्तिसम्बन्धेन न भूत्वा समवायसम्बन्धेन भवति तदा घटादिपदात् घटपदार्थस्य बोधो न भूत्वा आकाशस्यापि बोधो भवेत्। यतो हि शब्देन सह आकाशस्य

---

१. भाषापरिच्छेदः, कारिका ८१

सर्वदा समवायः सम्बन्धो वर्तते।

वृत्त्या एव पदेन सह पदार्थस्य बोधो भवति। वृत्तिः पदेन सह पदार्थस्य सम्बन्धः। सा वृत्तिः द्विविधा, शक्तिः लक्षना च। इत्युक्ते पदस्य शक्त्या लक्षणया वा पदार्थोपस्थितेः परमेव शाब्दबोधो भवति। पदपदार्थयोः वृत्तिसम्बन्धेन पदश्रवणादेव पदार्थस्य उपस्थितिः भवति, यतो हि पदज्ञानरूपस्य एकसम्बन्धिनो ज्ञानादेव अपरसम्बन्धिनः पदार्थस्य स्मरणं भवति। अतः उक्तं मुक्तावल्यां- *'पदज्ञानस्य ह्येकसम्बन्धिज्ञानविधया पदार्थोपस्थापकत्वम्'*[२] इति।

## ❖ पदज्ञानं शाब्दाबोधस्य करणम्

शाब्दज्ञानस्य करणं तु पदज्ञानम्। पदज्ञानेन पदार्थस्य यः बोधः स एव शाब्दवोधः इति। प्राचीन-न्यायदर्शने ज्ञायमानं पदमेव शाब्दबोधस्य करणम् इति उक्तम्। परन्तु नव्यनैयायिकाः वदन्ति यत्, ज्ञायमानं पदं शाब्दबोधस्य करणं न, पदज्ञानमेव शाब्दबोधस्य करणम्। नैयायिकाः असाधारणं कारणमेव करणम् इति वदन्ति। यस्याः कस्यापि कार्यस्य असाधारणं कारणमेव करणम् उच्यते (*व्यापारवद् असाधारणं कारणं कारणम्*)[३]। यानि कारणानि सर्वकार्यस्य कारणानि तानि साधारणकारणानि। यथा – देशः, कालः, ईश्वरः, आत्मा, इत्यादीनि प्रत्यक्षादिसर्वज्ञानस्य कारणानि, अतः तानि साधारणानि। यत् कारणम् असाधारणं तत् केवलं निर्दिष्टज्ञानस्य कारणं भवति – यथा इन्द्रियार्थसन्निकर्षः प्रत्यक्षस्य, व्याप्तिज्ञानम् अनुमानस्य, सादृशज्ञानम् उपमानस्य अपि च पदज्ञानं शाब्दबोधस्य असाधारणं कारणम् इति।[४] एतद् असाधारणं कारणं व्यापारवत् सति करणं भवति। चक्षुरिन्द्रियं तदा एव रूपस्य प्रत्यक्षज्ञानं दातुं शक्नोति यदा चक्षुरिन्द्रियेन सह रूपस्य सन्निकर्षो भवति। अयं सन्निकर्षः एव व्यापारः। हस्ते कुठारः स्थिते सत्येपि छेदनक्रिया न भवति यदि तत्र उद्यमनिपतनं क्रिया न विद्यते। शाब्दबोधस्य क्षेत्रेऽपि पदज्ञानेन पदार्थस्य स्मरणमेव व्यापारः। अतः 'व्यापारः' इत्युक्ते पदज्ञानजन्यपदार्थस्मरणम्। शाब्दबोधे पदार्थस्मरणं पदजन्यमेव स्याद्, अन्योपायेन

२. भाषापरिच्छेदः, पृ २३५

३. "असाधारणं कारणं करणम्। असाधारणत्वं व्यापारवत्वं।" तदेव, कारिका ५४।

४. "अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः। एवं सादृशज्ञानकरणं ज्ञानमुपमितिः। पदज्ञानकरणकं ज्ञानं शाब्दबोधः।" "अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य स्मृतावनुभवस्य च करणत्वात् तत्र तत्र नातिव्याप्तिः। तदेव, कारिका ५१, ५२

पदार्थस्मरणं व्यापारः न उच्यते। यतो हि, येन पदस्य ज्ञानम् अर्जितं तस्य प्रत्यक्षेण अनुमानेन वा पदार्थस्य स्मरणात्मकोपस्थितिः भवितुं शक्यते। तादृशा पदार्थोपस्थितिः न व्यापारः, यतो हि सा प्रत्यक्षेण अनुमानेन वा जाता । अतः शाब्दबोधस्य करणं पदज्ञानम् यत्र पदजन्यपदार्थस्मरणं व्यापारः इति।

## ❖ ज्ञायमानं पदं न करणम्

मुक्तावल्यां विश्वनाथेन उक्तं पदज्ञानं शाब्दबोधस्य करणं नतु ज्ञायमानं पदम्। ज्ञायमानं पदं करणम् इति उक्ते सति मौनिश्लोकादिभ्यः शाब्दबोधो भवितुं न शक्यते । परन्तु मौनिश्लोकादिभ्यः अस्माकं शाब्दबोधो भवति । साधारणतः 'मौनश्लोकादि' इति पदेन मौनव्याक्तेः मनसा श्लोकपाठः अवबोध्यते। किन्तु 'आदि' पदेन इतोऽपि अन्ये बहवः विषयाः ईप्सिताः भवन्ति । दिनकरीटीकायां 'आदि' पदेन द्वित्वादिबोधक- हस्तचेष्टादेः संग्रहः अवगम्यते । हस्तचेष्टादिनापि अस्माकं शाब्दबोधो भवति । इतोऽपि 'मौनश्लोक' इत्युक्ते लिखितश्लोकः लिपिः वा अवबोध्यते । अनेन लिखित-श्लोकेन लिप्या वापि अस्माकं शाब्दबोधो भवति। अतः पदस्य ज्ञानमेव शाब्दबोधस्य करणं, न तु ज्ञायमानम् उच्चारितपदं वा करणम्। परन्तु मौनश्लोकादिभ्यः अस्माकं कथं शाब्दबोधो भवति ? यदा वक्ता पदम् उच्चरति तदा श्रोतुः प्रथमतः श्रावणप्रत्यक्षं भवति। अनन्तरं श्रोतुः पूर्वार्जितशक्तिज्ञानेन एकस्मात् पदात् एकस्य पदार्थस्य स्मरणं भवति। एवं रूपेण श्रोतुः शाब्दबोधो भवति। अपरस्मिन् पक्षे यत्र पदस्य उच्चारणं विहाय एव शाब्दबोधो भवति, तत्र पुस्तकं पठित्वा लिपिं वा दृष्ट्वा पदस्य अनुमापकपंक्त्या अस्माकं निर्दिष्टपदस्य स्मरणं भवति। अनेन स्मृतपदेन निर्दिष्टपदार्थस्य ज्ञानं भवति। ईदृशः बोधः एव शाब्दबोधः।

## ❖ शाब्दबोधस्य व्यापारः

पूर्वम् अस्माभिः दृष्टं यत् शाब्दबोधस्य करणं तावत् पदज्ञानम्। अर्थात् पदज्ञानं शाब्दबोधस्य व्यापारवत् कारणम् इति । इत्युक्ते करणं सदा व्यापारवत् भवति। अतः को नाम व्यापारः ?

कारिकायां विश्वनाथमहाभागेन उक्तम्- *'द्वारं तत्र पदार्थधीः'*[5]। अत्र 'द्वारम्' इत्युक्ते व्यापारः । 'तत्र' पदस्य अर्थ शाब्दबोधे । 'पदार्थधीः' पदस्य अर्थः पदार्थज्ञानम् इति । अतः कारिकांशस्य सरलार्थः भवति पदार्थस्य ज्ञानमेव व्यापारः इत्युक्ते पदार्थज्ञानमेव व्यापारः । परन्तु कीदृशं पदार्थज्ञानं व्यापारः भवति ? तस्य उत्तरं मुक्तावल्यां विश्वनाथेन उक्तं – पदजन्यपदार्थज्ञानमेव व्यापारः । अर्थात् एकं पदं श्रुत्वा श्रोतुः यस्य पदस्य स्मरणं भवति, तस्य पदार्थस्य स्मरणात्मकं ज्ञानमेव व्यापारः । अत्र लक्ष्यणीयं यत्, पदजन्यपदार्थस्य स्मरणमेव शाब्दबोधस्य व्यापारः । केवलं पदार्थस्य स्मरणमेव व्यापारः न । केवलं पदार्थस्य स्मरणमेव शाब्दबोधस्य व्यापारो भवति चेद् यस्य पदज्ञानम् अस्ति, तस्य पदार्थस्य स्मरणमात्रेण एव शाब्दबोधो भवेत् , पदश्रवणस्य आवश्यकता न निष्ठेत् । किन्तु तथा न भवति । अतः न्यायमते पदजन्यपदार्थस्य स्मरणमेव शाब्दबोधस्य व्यापारः इति ।

## ❖ वृत्त्या पदजन्यत्वं इति पदस्य तात्पर्य्यम्

एतावत् व्याख्यानं कृतं यत्, शाब्दबोधस्य करणं पदज्ञानं, पदजन्यपदार्थस्मरणम् व्यापारः । पदजन्यपदार्थस्मरणे स्मरणीयं यत्, तत् वृत्त्या पदजन्यत्वं स्यात् । इत्युक्ते वृत्तिसम्बन्धेन पदज्ञानात् पदार्थस्मरणं भवेत् । यतो हि, यथा पदेन सह पदार्थस्य वृत्तिसम्बन्धः वर्तते, तथा पदेन सह आकाशस्य अपि समवायः सम्बन्धः वर्तते । शब्द आकाशस्य गुणः । अतः शब्दमात्रः एव आकाशेन सह समवायसम्बन्धेन सम्बन्धितः । तदर्थं 'घटः' इत्यादिपदस्य श्रवणमात्रेण यथा घटपदार्थस्य बोधो भवितुं शक्यते, तथा आकाशस्यापि बोधो भवितुं शक्यते। सम्बन्धस्य नियमानुसारेण *'एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकं भवति'*। अनेन नियमानुसारेण कस्यापि एकस्य पदस्य श्रवणेन तेन पदेन सह सम्बन्धस्य आकाशस्यापि उपस्थितिः शाब्दबोधस्य विषयो भवितुं शक्यते। अतः 'घटः' इति पदश्रवणेन घटपदार्थस्य यथा शाब्दबोधो भवति, तथा आकाशस्यापि शाब्दबोधस्य आकाङ्क्षा जायते। परन्तु 'घटः' इति पदजन्यशाब्दबोधक्षेत्रे आकाशविषयकशाब्दबोधो न भवितुं शक्यते। अतः पदजन्यत्वम् इत्युक्ते वृत्त्यापदजन्यत्वं पदार्थोपस्थितिः वक्तव्या। तदा आकाशविषयकशाब्दबोधस्य प्रसङ्गो

---

५. भाषापरिच्छेदः, कारिका ८१

अत्र न आगच्छति। एवं रूपेण वृत्तिजन्य-पदार्थोपस्थितिः एव शाब्दबोधस्य व्यापारः।

## ❖ शाब्दबोधस्य सहकारिकारणम्

शाब्दबोधस्य सहकारिकारणं निर्देशनार्थम् कारिकारायां उक्तम्-'*शक्तिधीः सहकारिणी*'[६] इति। 'शक्तिधीः पदस्य अर्थः शक्तेः ज्ञानं, यद् ज्ञानं शाब्दबोधस्य सहकारिकारणम्। अस्माभिः दृष्टं यत्, शाब्दबोधक्षेत्रे या पदजन्यपदार्थोपस्थितिः सा वृत्त्यापदजन्य-पदार्थोपस्थितिः स्यात्। इत्यत्र वृत्तेः व्याख्यानकाले ग्रन्थकारेण मुक्तावल्याम् उक्तं –'*वृत्तिश्च शक्तिलक्षणान्यतर-सम्बन्धः*'। यद्यपि कारिकायां ग्रन्थकारेण शक्तिरेव शाब्दबोधस्य सहकारिकारणम् उक्तं, तथापि शक्तिवत् लक्षणापि शाब्दबोधस्य सहकारिकारणम् इति अवगन्तव्यम्। वस्तुतः शक्तेः लक्षणायाः च ज्ञानं विना पदश्रवणादनन्तरं पदार्थस्य स्मरणं नैव भवति। तस्मात् कारणात् शक्तेः लक्षणायाः च ज्ञानं शाब्दबोधस्य सहकारिकारणम् इति उक्तं वर्तते।

## ❖ वृत्तिरूपेण शक्तिः

पूर्वम् अस्माभिः आलोचितं शाब्दबोधस्य करणं, व्यापारः, वृत्तिः, सहकारिकारण- मित्यादयः। अधुना वृत्तिरूपेण शक्तेः स्वरूपम् आलोच्यते। शक्तेः परिचयप्रदानकाले ग्रन्थकारेण मुक्तावल्यामुक्तम् –'*शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः*'[७] इति। इयं शक्तिः कोऽपि भिन्नपदार्थो नः, इच्छारूपो गुणपदार्थः। न्यायमते पद-पदार्थयोः सम्बन्धस्य पारिभाषिकं नाम वृत्तिः। वृत्तिः द्विविधा; शक्तिः लक्षणा च। शक्तिः मुख्यवृत्तिः लक्षणा गौणवृत्तिः। शक्त्याः यदा पदार्थज्ञानं न भवति तदा लक्षणायाः प्रयोजनं भवति।

येन केनापि पदेन यस्य कस्यापि पदार्थस्य उपस्थितिः भवति, तथा न। एकेन निर्दिष्टपदेन एकस्य निर्दिष्टपदस्य एव उपस्थितिः भवति। इत्युक्ते एकेन विशेषपदेन सह एकस्य विशेषपदार्थस्य सम्बन्धः एव शक्तिः। सा शक्ति '*अस्माच्छब्दादयमर्थः बोद्धव्य*

---

६. भाषापरिच्छेदः, कारिका ८१

७. तदेव

*इतीश्वरेच्छारूपा'*[८]। वस्तुतः प्राचीननैयायिकानां मतानुसारेण ईश्वरस्य इच्छा एव शक्तिः, तदतिरिक्तः किमपि न। अर्थात् ईश्वरस्य इच्छानुसारेण एव एकेन निर्दिष्टपदेन एकस्य निर्दिष्टपदस्य एव उपस्थितिः भवति । यथा, 'घटः' इति पदेन ईश्वरस्य इच्छानुसारेण घटपदार्थस्य उपस्थितिः भवति । इत्युक्ते घटपदे घटपदार्थ- प्रतिपादकेश्वरच्छाशक्तिः वर्तते । ईश्वरस्य ईदृशा इच्छाशक्तिः एव शक्तिनामकवृत्तिः।

अत्र आपत्तिः भवितुं शक्यते यत्, ईश्वरेच्छा यदि एकेन निर्दिष्टपदेन एकस्य निर्दिष्टपदस्य एव उपस्थितेः कारणं भवति, तर्हि पितृकृतनाम्नः पुत्रविशेषस्य ज्ञानं नैव भवितुं शक्यते। यतो हि, अत्र पितुः इच्छया एव पुत्रविशेषस्य ज्ञानं भवति, ईश्वरस्य इच्छायाः अत्रः कोऽपि अवकाशो नास्ति । तस्य समाधानाय ग्रन्थकारेण मुक्तावल्याम् उक्तम् '*आधुनिके नाम्नि शक्तिरस्त्येव, "एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्त्वात्*"'[९]। अर्थात् आधुनिकनाम्नि अपि इत्युक्ते इदानीन्तनपितृकृतनाम्नि अपि ईश्वरस्य इच्छा अस्ति । तया ईश्वरेच्छया एव पितृकृतनाम्नः पुत्रविशेषस्य बोधो भवति । 'एकादशेऽहनि पिता नाम कुर्याद्' ईदृशविधिवाक्येन एव ईश्वरस्य इच्छा निर्दिष्टा भवति । अर्थात् ईश्वरः इच्छति यत्, पिता एकादशे दिवसे नवजातपुत्रस्य नाम करोतु इति। अतः पितृकृतनाम्नि अपि ईश्वरस्य इच्छा वर्तते।

नामानि सम्पूर्णरूपेण आधुनिकपुरुषैः कृतानि सन्ति, तत्र ईश्वरस्य ईच्छाशक्तिः न कारणम् । यथा, व्याकरणे 'नदी', 'वृद्धिः' इत्यादीनि पारिभाषिकनामानि। एतानि नामानि सम्पूर्णरूपेण आधुनिकपुरुषकृतानि । अतः ईश्वरस्य ईच्छाशक्तेः अवकाशः नास्ति । अतः तत्र कथं शाब्दबोधो भवति ? सम्प्रदायविशेषस्य मतानुसारेण अत्र शक्तिभ्रमात् शाब्दबोधः भवति।

तथापि आपत्तिः न दूरीभवति । ये जना ईश्वरं न स्वीकुर्वन्ति ते ईश्वरस्य शक्तिमपि न स्वीकुर्वन्ति। अतः तेषां शाब्दबोधः अपि न भवितुं शक्यते। परन्तु नास्तिकानामपि शाब्दबोधः भवति। अतः अस्याः समस्यायाः निराकरणार्थं नव्यनैयायिकैः उक्तं यत्, न केवलम् ईश्वरस्य इच्छा शक्तिवृत्तिः, परन्तु इच्छा एव। सा इच्छा ईश्वरस्य भवितुं शक्यते अथवा कस्यापि जनस्य

---

८ . भाषापरिच्छेदः, कारिका, ८१

९. तदेव

भवितुं शक्यते। अतः विश्वनाथेन मुक्तावल्याम् उक्तम्- *'ईश्वरेच्छा न शक्तिः, किन्त्विच्छैव'*[१०]। एतेन निर्दिष्टपदेन निर्दिष्टपदस्य उपस्थितौ यस्या कस्यापि आप्तव्याक्तेः इच्छा एव शक्तिरूपेण ग्राह्या।

## ❖ ***शक्तिग्रहः***

शक्तिग्रहः इत्युक्ते एकं पदं कमर्थं बोधयिष्यति तस्य ज्ञानम् इति। पद-पदार्थयोः वाच्यवाचकः सम्बन्धः एव शक्तिः। अतः शक्तिज्ञानम् इत्युक्ते पद-पदार्थयोः वाच्य-वाच्यकसम्बन्धस्य ज्ञानम्। अनेन सम्बन्धज्ञानेन एव अस्माकं निर्दिष्टपदात् निर्दिष्ट-पदस्य शाब्दबोधो भवति।

## ❖ **शक्तिग्रहस्य उपायाः**

पूर्वं वयं ज्ञातवन्तः यत्, शक्त्या एव एकेन निर्दिष्टेन पदेन एकस्य निर्दिष्टपदस्य स्मरणं भवति। इत्युक्ते पदे शक्तिः विद्यते। सा शक्ति इच्छारूपिणी। इच्छारूपिणी सा शक्तिः ईश्वरस्य मनुष्यस्य वा भवितुं शक्यते। पद-पदार्थयोः मध्ये केवलं शक्तिः स्थिते सति न लाभः यावत् अस्माकं शक्तेः ज्ञानं न भवति। अतः अस्माभिः शक्तिज्ञानं अर्जनीयम्। यस्माद् अस्माकं पद-पदार्थयोः शक्तिसम्बन्धस्य ज्ञानं भवति तदेव शक्तिग्रहस्य उपायः। शक्तिग्रहस्य उपायविषये विश्वनाथेन कारिकाम् उद्धृतवान्।

*"शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।*
*वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा॥"* इति।

कारिकायामस्याम् शक्तिग्रहस्य अष्टोपायाः उद्धृताः सन्ति। क्रमानुसारेण तेषाम् आलोचनं क्रियते।

---

१०. भाषापरिच्छेदः, पृ २३७

## १. व्याकरणात्

ग्रन्थकारेण मुक्तावक्याम् उक्तं यत्, धातु-प्रकृति-प्रत्यय-निपातादीनां शक्तिग्रहः व्याकरणाद् भवति। यथा 'भू सत्तायाम्' व्याकारणस्य अस्मात् सूत्रात् 'भू' धातोः 'सत्ता' इत्यर्थे शक्तिग्रहः भवति। एवं 'वर्तमाने लट्' इति सूत्रात् वर्तमानकालार्थे 'तिप्' इत्यादिप्रत्ययस्य शक्तिज्ञानं भवति। यद्यपि कस्मिञ्चित् विषये वैयाकरण-नैयायिकयोः मध्ये विरोधो भूते सति नैयायिकाः वैयाकरणानां मतं त्यजन्ति[११]। यथा 'आख्यातस्य शक्तिः कर्तरि कृतौ वा वर्तते' इति विषयम् आधारीकृत्य वैयाकरण-नैयायिकयोः मध्ये विरोधो वर्तते। वैयाकरणाः आख्यातस्य शक्तिः कर्तरि कृतिराश्रये वा स्वीकुर्वन्ति। परन्तु नैयायिकाः आख्यातस्य शक्तिः कृतौ स्वीकुर्वन्ति। यतो हि कर्तरि शक्तेः स्वीकृते सति गौरवो भवति। परन्तु यदि कर्तुः कृतौ शक्तेः स्वीकरणं भवति चेत् लाघवो भवति। अतः नैयायिका वैयाकरणस्य इदं मतं त्यजन्ति। इतोऽपि व्याकरणात् शक्तिग्रहविषये बहवः विषयाः सन्ति मुक्तावल्यां वर्तन्ते।

## २. उपमानात्

शक्तिग्रहस्य द्वितीयोपायः भवति उपमानप्रमाणम्। उपमानप्रमाणेन केनापि प्रसिद्ध- पदार्थेन कस्यापि सादृशपदार्थस्य निश्चितज्ञानं भवति। उपमानप्रमाणेन यज्ज्ञानं भवति तत् उपमितिः कथ्यते। अतः उच्यते 'उपिमितिज्ञानकरणं उपमानम्'[२] इति। ईदृशं ज्ञानं, कस्माच्चित् विश्वस्तजनात् श्रुतसादृश्यज्ञानस्य स्मरणेन स्वस्य प्रत्यक्षेण च भवति। यथा, 'गवयः' इति पदवाच्यपदार्थं न जानाति ईदृशः कोऽपि 'नागरिकः' यदा कस्मादरण्यजनमुखात् जानाति यत् 'गवयः' तावत् गोसदृशः एकः जन्तुः इति। सः नागरिकः यदा कदापि अरण्यं गत्वा यदि गो-सदृशमेकम् अपूर्वदृष्टं जन्तुं पश्येत् अरण्यजनस्य वाक्यं च स्मरेत्, तर्हि 'अयं जन्तुः गवयः पदवाच्यः' ईदृशज्ञानं तस्य भवति।

## ३. कोशात्

शक्तिग्रहस्य तृतीयोपायः अस्ति कोशः। इत्युक्ते कोशादपि पदस्य शक्तेः ज्ञानं भवति। कोऽपि शब्दः कमर्थं बोधयति तद् वयं ज्ञातुं शक्नुमः कोशाद् अभिधानाद्वा। इतोऽपि पदस्य

११. "क्वचित् तु वाधके सति त्यज्यते" भाषापरिच्छेदः, पृ २३९

पर्यायपदानामपि ज्ञानं भवति कोशात् । वस्तुतः कोशस्य कार्यः एव अस्ति, एकस्य पदस्य कस्मिन् पदार्थे शक्तिः अस्ति तत् निर्देशः यद्यपि बाधके सति नैयायिकाः कोशनिर्देशार्थं परित्यजन्ति[१२] । यथा, कोशे नीलरूपादेः शक्तिः नीलरूपे नीलरूपविशिष्टद्रवे च स्वीकृते । अर्थात् नीलपदेन यथा नीलरूपं बोधयति, तथा नीलरूपविशिष्टद्रव्यमपि बोधयति । परन्तु नैयायिकाः एतादृशं मतं परित्यजन्ति । नैयायिकाः वदन्ति यत्, नीलादिरूपविशिष्टे द्रव्ये शक्तिः स्वीकृते सति अनन्तनीलादि- रूपविशिष्टद्रव्ये अनन्तशक्तिः स्वीकरणीया भवति, येन गौरवदोषः भवति । परन्तु यदि केवलं नीलरूपे शक्तिः स्वीक्रियते तर्हि नीलत्वादिजातिः शक्यतावच्छेदधर्मो भवितुं शक्यते, ततः अनन्तशक्तेः स्वीकरणं नैव भवति । एवं लाघवयुक्त्या नैयायिकैः केवलं नीलरूपादौ(गुणे) एव शक्तिः स्वीक्रियते ।

## ४. आप्तवाक्यात्

शक्तिग्रहस्य चतुर्थोपायः भवति आप्तवाक्यम् । आप्तः इत्युक्ते यथार्थवक्ता । आप्तव्यक्तेः वाक्यम् आप्तवाक्यम् । यद् वस्तु यथा वर्तते तथा यः जानाति एवं च यथा सः जानाति तथा यदि अपरं ज्ञापयति तर्हि सः आप्तः अर्थाद् विश्वस्तः वक्ता । तस्य वाक्यम् आप्तवाक्यम् । अयम् आप्तव्यक्तिः यदा यत् पदम् उच्चरति तदा तत् पदं श्रुत्वा श्रोतुः यथार्थपदार्थज्ञानं भवति । यथा, आप्तव्यक्तिः यदा वदति यत्, कोकिलः पिकपदवाच्यः, तदा पिकपदेन श्रोतुः कोकिले शक्तिग्रहो भवति ।

## ५. वृद्धव्यवहारात्

शक्तिग्रहस्य पञ्चमोपायः भवति वृद्धव्यवहारः । 'वृद्धव्यवहारः' इत्युक्ते वृद्धव्यक्तेः व्यवहारः अवबोध्यते । पिता, माता, वृद्धजनः यानि वाक्यानि व्यवहरन्ति तेषां पर्यवेक्षणं कृत्वा श्रोता यथा आचरति तथा पार्श्वस्थबालस्य यः शक्तिग्रहः भवति सः वृद्धव्यवहारजन्यः शक्तिग्रहः उच्यते । अस्मिन् क्षेत्रे द्वौ वृद्धजनौ एकः बालकः च उपिस्थिताः सन्ति । द्वयोः वृद्धजनयोः व्यवहारं दृष्ट्वा बालकस्य शक्तिग्रहः भवति । द्वयोः वृद्धजनयोः एकः प्रयोजककर्ता अपरः प्रयोज्यकर्ता । प्रयोजककर्ता किमपि कर्तुम् वाक्यानां प्रयोगं करोति । प्रयोज्यकर्ता प्रयोजककर्तुः

१२. "कोषादपि शक्तिग्रहः । सति वाधके क्वचित् त्यजते ।" तदेव, पृ २४२

आदेशानुसारेण कार्यं करोति । एकस्य शब्दस्य एकाधिकवाक्ये प्रयोगात्, अन्यान्यशब्दानां परिवर्तनं दृष्ट्वा, प्रयोज्यव्यक्तेः आचरणस्य परिवर्तनं दृष्ट्वा च उपस्थितस्य बालकस्य पदस्य शक्तिग्रहः भवति । उदाहरणरूपेण वक्तुं शक्यते, यदा एकः प्रयोजकः वृद्धः प्रयोज्यवृद्धम् आदिशति 'घटमानय' इति, तदा प्रयोज्यवृद्धः पदार्थममुम् प्रयोजकवृद्धस्य पुरतः आनयति । अपि च यदा प्रयोजकः वृद्धः प्रयोज्यवृद्धम् आदिशति 'गामानय' तदा प्रयोज्यवृद्धः विशेषाकृतिजन्तुमेकम् आनयति । प्रयोज्यवृद्धस्य ईदृशमाचरणं दृष्ट्वा उपस्थितशिक्षार्थिनो बालकस्य पदस्य ग्रहणेन वर्जनेन च घटपदार्थे यः 'घटः' इति पदस्य शक्तिग्रहः भवति सः वृद्धव्यवहारजन्यशक्तिग्रहः उच्यते । न्यायस्य परिभाषायाम् इयं प्रक्रिया 'आवाप-उद्वाप' इति प्रक्रिया उच्यते । उल्लेख्यं यत्, शक्तिग्रहस्य ये अष्ट उपायाः सन्ति, तेषु वृद्धव्यवहारः एव सर्वप्रथमः । शिशुः वृद्धव्यवहारेण प्रप्रथमं पदशक्तेः ज्ञानम् अर्जयति । अतः वृद्धव्यवहारः एव शक्तिग्रहस्य प्राथमिकोपायः ।

## ६. वाक्यशेषात्

शक्तिग्रहस्य षष्ठोपायः भवति व्याक्यशेषः । 'वाक्यशेषः' इत्युक्ते अवशिष्टवाक्यम् । वैदिकवाक्यस्य क्षेत्रे अर्थवादवाक्यं तावत् अवशिष्टवाक्यम् । अनेकवैदिकवाक्येषु 'यव' शब्दः लक्ष्यते । आर्यगणैः 'यव'शब्देन एकं दीर्घशूकविशिष्टशस्यविशेषम् अवबोध्यते । अपि च म्लेच्छगनैः 'यव'शब्देन कङ्गुविशेषशस्यमेकम् अव-बोध्यते । अतः 'यव' इति शब्देन कं शस्यम् अवगमनीयम् ? यदा कस्यापि पदस्य शक्तिग्रहणे ईदृशः संशयः दृश्यते, तदा वाक्यशेषेण पदस्य शक्तिः गृहीता भवति । शास्त्रे वाक्यशेषः प्राप्यते –

*"वसन्ते सर्वशस्यानां जायते पत्रशातनम् ।*
*मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः"* ॥ इति ।

एतेन अवगम्यते यत् दीर्घशूकविशिष्टशस्यविशेषः 'यव' इति पदस्य अर्थः ।

## ७. विवरणात्

शक्तिग्रहस्य सप्तमोपायः भवति विवरणम् । विवरणं विवृतिः वा भवति समानार्थकपदानां शक्तिग्रहरस्य उपायः । समानार्थकपदानां क्षेत्रे प्रथमोच्चारितपदं द्वितीयोच्चारितपदम् च अभिन्नार्थबोधकम्, तदर्थं द्वितीयोच्चारितपदेन प्रथमोच्चारितपदस्य अर्थः कथितः भवति। उदाहरणस्वरूपेण, यः व्यक्तिः 'कलशः' इत्यस्य अर्थं जानाति, परन्तु 'घटः' इत्यस्य अर्थं न जानाति, तादृशजनं प्रति यदि उच्यते यत् घटः कलशः इत्यस्य नामान्तरं, तर्हि तस्य जनस्य कलशे घटपदस्य शक्तिग्रहः भवति। शक्तिग्रहस्य ईदृशोपायो विवरणम् उच्यते।

## ८. प्रसिद्धपदसान्निध्यात्

शक्तिग्रहस्य अष्टमोपायः भवति प्रसिद्धपदसान्निध्यः । प्रसिद्धपदस्य सान्निध्याद् अस्माकम् अप्रसिद्धपदस्य शक्तिग्रहः भवति । उदाहरणरूपेण, सहकारतरौ मधुरं पिको रौतीत्यादौ पिकशब्दस्य शक्तिग्रहः भवति। इत्यत्र सहकारतरुः, मधुरं, रौति इत्यादि-प्रसिद्धपदानाम् अर्थं यः जानाति, सः अप्रसिद्धपिकशब्दस्य अर्थमपि अवगच्छति।

## ❖ शक्तेः स्थाननिर्णयः

अधुना आलोच्यविषयः अस्ति शक्तेः स्थाननिर्णयः । इत्युक्ते पदोच्चारणात् परम् अर्थरूपेण व्यक्तेः जातेः वा बुद्धिग्राह्यः भवति ? मीमांसकाः शक्तेः स्थानं जातौ नैयायिकाः च व्यक्तौ स्वीकुरुतः । विश्वनाथन्यायपञ्चाननेन ८१ तमकारिकायायाः मुक्तावलीटीकायां प्रथमे मीमांसकानां मतम् उल्लिख्य खण्डनं कृतम् । मीमांसाकानां मतानुसारं पदस्य शक्तिः शक्तेः ज्ञानञ्च जातौ एव तिष्ठतः । अर्थात् मीमांसामते 'जातावेव शक्तिग्रहः।' यथा घटपदेन घटत्वजातेः एव अवबोधः भवति । वस्तुतः जातिभिन्नव्यक्तेः अनुभवो नैव भवति । घटत्वविशिष्टपदार्थः एव घटः इति नाम्ना अभिधीयते । मीमांसकाः स्वमतप्रतिष्ठार्थं नैयायिकानां विरुद्धे आपत्तिद्वयं प्रधानरूपेण उपस्थापयन्ति।

प्रथमतः, यदि व्यक्तौ शक्तिः स्वीकृयते तर्हि व्यभिचारः आनन्त्यदोषः च भवतः । व्यक्तिः शक्तिः गृहीते सति प्रश्नः आयाति यत्, पदश्रवाद् अनन्तरम् एकस्य निर्दिष्ट-व्यक्तेः सकलव्यक्तेः वा शक्तिग्रहः भावति ? कस्मिञ्चित् विशेषव्यक्तौ शक्तिः स्वीकृते सति घटपदेन एकविशेषघटस्य एव बुद्धिग्राह्यः भवति, अन्यान्यघटानां न भवति । परन्तु वास्तविकतया घटपदस्य उच्चारणेन विषेशघटेन सह सकलघट-पदार्थानां बोधः भवति । अतः अत्र व्यभिचारो भवति । तथापि व्यभिचारं परिहर्तुं सकलव्यक्तौ यदि शक्तिकल्पना क्रियते, तर्हि आनन्त्यदोषः गौरवदोषः वा दृश्यते । यतो हि व्यक्तिः अनन्तः, असंख्यः च ।

द्वितीयतः, मीमांसकाः वदन्ति यत्, विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणम् । एकस्य घटस्य ज्ञानं भवति विशिष्टज्ञानम् । अत्र घटो विशेष्यो घटत्वं विशेषणम् । अतः विशेषणज्ञानं विना विशिष्टज्ञानं नैव भवितुं शक्यते । अतः व्यक्तेः ज्ञानार्थं प्रथमं जातेः ज्ञानम् अवगच्छेत् । अतः जातौ एव शक्तिः न तु व्यक्तौ ।

मीमांसाकानाम् मतमिदम् अग्राह्यः भवति "तन्न । शक्तिं विना------"[१३]इत्यादि ग्रन्थांशे । पदस्य शक्तिज्ञानमेव शाब्दबोधस्य विषयं निर्दिशति । यस्मिन् विषये पदस्य शक्तिः स्वीकृता न भवति तस्य विषयस्य शाब्दबोधः न भवति । जातौ पदस्य शक्तिः गृहीता चेत् जातिः एव शाब्दबोधस्य विषयः भवति, व्यक्तिः न । परन्तु, 'गाम् आनय', गां बधान' इत्यादिवाक्येन गौव्यक्तेः एव बोधः भवति, न तु जातेः ।

एवं रूपेण मुक्तावल्यां नैयायिक-मीमांसकयोः मध्ये वादानुवादाः अनेके सन्ति, बाहुल्यात् न दीयते । अन्तिमे नव्यन्यायानुसारिविश्वनाथन्यायपञ्चाननस्य न्यायसम्मतं मतं दीयते । विश्वनाथेन उक्तम् –*'शक्तिर्जात्याकृतिविशिष्टव्यक्तावेव विश्राम्यतीति ।'* अर्थाद् जात्याकृतिविशिष्टव्यक्तौ एव शक्तिः विश्रान्ता भवति । इत्युक्ते केवलं जातौ आकृतौ वा शक्तिः स्वीकृते चेत् व्यक्ते ज्ञानं न भवति । वयं पश्यामः यत्, एकेन पदोच्चारणेन अस्माकं यद् ज्ञानं भवति तद् विशिष्टज्ञानम्, अविशिष्टज्ञानं न । अस्य विशिष्टज्ञानस्य विषयः कदापि जातिविशिष्टः व्याक्तिः, कदापि आकृति- विशिष्टः व्यक्तिः, कदापि जात्याकृतिविशिष्टः व्यक्तिः । केवलं जाति, केवलम् आकृतिः वा केवलं व्याक्तिः अस्य ज्ञानस्य विषयः न भवति । उदाहरणरूपेण,

---

१३. भाषापरिच्छेदः, पृ २४८

'गौ' इति शब्दश्रवणान्तरं कस्यापि कदापि गोत्वजातेः स्मरणं भवति, जात्याकृतिविशिष्ट-गौव्यक्तेः स्मरणं भवति । अतः न्यायसिद्धन्तः भवति जात्याकृतिविशिष्टव्यक्तौ एव पदस्य शक्तिः ।

## ❖ न्यायमते पदम्

एतावद् अस्माभिः दृष्टं यत्, पदज्ञानमेव शाब्दबोधस्य करणम्, नतु ज्ञायमानपदम् इति । अस्माभिः इदमपि दृष्टं यत्, पदस्य शक्तिः एव पदार्थबोधकः । अधुना आलोचनीयं यत्, किं नाम पदम् इति । वैयाकरणै उक्तं सुप्तिङन्तं पदम् । अर्थाद् यस्य अन्ते सुप्विभक्तिः तिङ्-विभक्तिः वा वर्तते तदेव पदम् । परन्तु नैयायिकानां मतं भिन्नम् । तेषां मते पदं भवति अर्थप्रतिपादनशक्तिविशिष्टशब्दः एव पदम् – '*शक्तं पदम्*'[१४]।

पदमिदं चतुर्विधम् । यौगिकम्, रूढं, योगरूढं, यौगिकरूढञ्च ।

### १. यौगिकम् पदम्

यत् पदं स्वस्य अवयवशक्त्या एव अर्थस्य बोधको भवति, तदेव यौगिकपदम् । प्रकृतिः प्रत्ययः च भवति पदस्य अवयवः । प्रकृतौ प्रत्यये च स्थिता शक्तिः एव अवयवशक्तिः । अनया अवयवशक्या एव यौगकपदस्य अर्थः निर्धारितः भवति । यथा, 'पाचकः' इति पदं 'पच्' धातुना सह 'अक्' प्रत्ययेन निर्मितम् । पच् धातो अर्थः पाकक्रिया, अक् प्रत्यस्य अर्थः कर्ता । अतः पाचकः इति पदस्य अर्थः भवति पाककर्ता इति ।

### २. रूढपदम्

यत् पदं तस्य अवयवशक्या अर्थस्य बोधकः न भुत्वा स्वतन्त्रशक्त्या कमपि अर्थं निर्दिशति तद् रूढपदम् उच्यते । रूढपदस्य शक्तिः समुदायशक्तिः इति उच्यते । यथा, गोमण्डपादि-

---

१४. तदेव, २५२

पदम् । 'गौ' इत्यत्र 'गम्'धातुना सह 'ड'प्रत्यनेन निष्पन्नो भवति । अतः अवयवशक्या गौपदस्य अर्थः भवति गमनकर्ता । परन्तु गौपदस्य ईदृशः अर्थः साधारणतया न व्यवह्नीयते । अतः 'गौ'पदं न यौगिकपदम् । वरं समुदायशक्त्या 'गौ'पदं गोत्वजातिविशिष्टप्राणी अव-बोध्यते ।

### ३. योगरूढपदम्

यस्य पदस्य अवयवशक्त्या निर्धारिते अर्थे समुदायशक्त्या निर्धारितविषयः अभिन्नरूपेण प्रतियमानः भवति, तत् पदं योगरूढम् उच्यते । यथा, 'पङ्कजादि-पदम् । पङ्कजपदे अस्ति अंशत्रयम् । यथा, पङ्क, जन्, ड । अवयवशक्या एतेषाम् अर्थः भवति पङ्के जातः कोऽपि पदार्थः । परन्तु तस्मिन् अर्थे 'पङ्कजपदस्य व्यवहारः न भवति । समुदायशक्या 'पङ्कजपदं' पद्मरूपेण एव व्यवह्रियते, न तु पङ्के जातशैवालादेः । एवम् अवयवशक्या समुदायशक्या च अर्थयुक्तं पदं योगरूढम् उच्यते ।

### ४. यौगिकरूढपदम्

यस्मात् पदात् स्वतन्त्ररूपेण यौगिकार्थरूढ्यार्थयोः बोधः भवति तत् यौगिकरूढ-पदम् । यथा- उद्भिदादि पदम् । अवयवशक्त्या उद्भिदपदेन यथा उद्भेनकर्ता तरुगुल्मादिर्बोधो भवति तथापि `याग'विशेषस्यापि बोधः भवति ।

## ❖ वृत्तिरूपेण लक्षणा

न्यायमते लक्षणा अन्यतमपदवृत्तिः । एकपदेन सह तस्य वाच्यपदार्थस्य यः शाब्दबोधानुकूलसम्बन्धः सः पदस्य वृत्तिः । न्यायमते पदवृत्तिः द्विविधा, शक्तिः लक्षणा च । शक्तिः मूख्यवृत्तिः लक्षणा गौणवृत्तिः । शक्तिः यथा शाब्दबोधस्य सहकारिकारणं तथैव लक्षणापि शाब्दबोधस्य सहकारिकारणम् ।

विश्वनाथन्यायपञ्चाननेन भाषापरिच्छेदग्रन्थस्य ८२ कारिकायां लक्षणायाः लक्षणं कृतम् – "*लक्षणाशक्यसम्बन्धस्तात्पर्यानुपत्तितः*" । अर्थात् शक्यार्थेन सह सम्बन्धिता या सा लक्षणा । शक्त्या य अर्थः उपस्थापितो भवति सः शक्यार्थः, तथा लक्षणया यः अर्थः उपस्थापितो भवति सः लक्ष्यार्थः । अत्र लक्षणीयं यत्, लक्ष्यार्थः शक्यार्थेन सह कोऽपि न वा कोऽपि सम्बन्धः वर्तते । यदा शक्यार्थेन वक्तुः तात्पर्यानुपत्तिः न भवति तदा शक्यार्थसम्बन्धः(लक्षणा) इष्टार्थग्रहणे सहायको भवति । यथा, 'गङ्गायां घोषः' इति वाक्ये गङ्गापदस्य शक्यार्थः 'गङ्गानदी' इति गृहीते सति वाक्यार्थः न उत्पद्यते । यतो हि गङ्गानद्यां घोषपल्ली स्थातुं न शक्यते । अतः अन्वयानुपत्तिः तात्पर्यम् वा असिद्धम्, इत्यनेन कारणेन लक्षणया गङ्गापदात् तीरस्य स्मरणं भवेत् । प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणम् । ततः शाब्दबोधः ।

अत्र प्रश्नः यत्, लक्षणास्वीकारस्य कारणं किम् ? अन्वयानुपपत्तिः तात्पर्यानुपपत्तिः वा ? ग्रन्थकारेण प्रथममेव अन्वयानुपपत्तिः किमर्थं लक्षणावृत्तिग्रहणस्य न कारणम् इति व्याख्यातम् । प्रथमोदाहरणम्, यदि अन्वयानुपपत्तिः लक्षणाग्रहणस्य कारणं स्यात् तर्हि 'यष्टीः प्रवेशय' इत्यत्र अन्वयानुपपत्तिं विनापि लक्षणाग्रहणस्य आवश्यकता वर्तते । यतो हि अत्र कापि अन्वयानुपपत्तिः नास्ति । परन्तु वक्तुः भोजनस्य तात्पर्यम् अत्र कथमपि न उत्पद्यते । अत्र लक्षणया वक्तुः तात्पर्यम् अस्ति यत्, 'भोजनस्य कृते यष्टिधरान् प्रवेशय' इति । अतः अन्वयानुपपत्तिः न तात्पर्यानुपपत्तिरेव लक्षणाग्रहणस्य कारणम् ।

द्वितीयोदाहरणं, 'काकेभ्यः दधि रक्ष्यताम्' इत्यत्रापि कापि अन्वयस्य अनुपपत्तिः नास्ति । तथापि काकपदे लक्षणा न गृहीते सति वक्तुः तात्पर्यं न उत्पद्यते । यतो हि वक्तुः तात्पर्यम् अस्ति यत्, 'न केवलं काकेभ्यः अपि तु दध्युपघातक-सर्व-जीवेभ्यः दधिः रक्ष्यताम्' इति । अतः तात्पर्यानुपपत्तिरेव लक्षणाग्रहणस्य कारणम् ।

तृतीयोदाहरणम्, 'छत्रिणः यान्ति' इत्यत्रापि अन्वयानुपपत्तिः कापि नास्ति । परन्तु वक्तुः तात्पर्यानुपपत्तिः अस्ति । वक्तुः तात्पर्यानुसारेण 'छत्रिणः' पदेन न केवलं छत्रधारिणाम् अपि तु छत्रहीनानामपि बोधः क्रियते । अत्र 'छत्रिणः यान्ति' इति वाक्ये अजहत्स्वार्थलक्षणा अभवत् ।

अनन्तरम् उदाहरणत्रयेण तात्पर्यानुपपत्तिरेव लक्षणाग्रहणस्य कारणम् इत्यस्य व्याख्यानं कृत्वा किमर्थम् अन्वयानुपपत्तिः लक्षणावृत्तिग्रहणस्य न कारणं तत् पुनः व्याख्यातम् । यथा, 'गङ्गायां घोषः' इत्यत्र लक्षणया गङ्गापदेन 'तीरस्य' घोषपदेन च 'मत्स्यस्य' बोधः भवति। अधुना यदि अन्वयानुपपत्तिः लक्षणायाः कारणं स्यात्, तर्हि 'गङ्गायां घोषः' इति वाक्यस्य अर्थबोधस्य कृते कदा 'गङ्गा'पदस्य कदा वा 'घोष'पदस्य लक्ष्यार्थः ग्रहणीयः इत्यस्य नियमो न स्यात्। परन्तु वक्तुः तात्पर्यम् एव वदति कदा गङ्गापदस्य कदा वा घोषपदस्य लक्ष्यार्थो ग्रहणीयः इति। अतः लक्षणावृत्तिग्रहणस्य कारणं तात्पर्यानुपपत्तिः न तु अन्वयानुपत्तिः इति।

नैयायिकाः लक्ष्यतावच्छेदके लक्षणां न स्वीकुर्वन्ति । तेषां मतम् अस्ति यत्, शक्यार्थसम्बन्धरूपा लक्षणा यद्धर्मविशिष्टपदार्थे गृहीता भवति तद्धर्मविशिष्टपदार्थरेव स्मतो भूत्वा शाब्दबोधस्य विषयः भवति । यथा, 'गङ्गा'पदस्य शक्यार्थस्य सम्बन्धरूपा लक्षणा यदि तीरत्वावच्छिन्नतीरे गृहीता भवति तर्हि तीरत्वप्रकारकतीरविशेष्यकस्मृति-द्वारा शाब्दबोधः उत्पद्यते । अपि च गङ्गातीरत्वावच्छिन्नतीरविशेष्ये लक्षणागृहीते सति गङ्गापदश्रवणात् गङ्गातीरत्वप्रकारकतीरविशेष्यकस्मृतिः उत्पद्यते । अस्मात् कारणात् लक्ष्यतावच्छेदकधर्मे लक्षणा न स्वीक्रियते अर्थात् लक्ष्यतावच्छेदकधर्मस्य शाब्दबोधाय लक्षणा न स्वीक्रियते।

शक्यार्थेन सह या सम्बन्धिता सा एव लक्षणा। अर्थात् शक्यार्थेन सह लक्ष्यार्थस्य सम्बन्धो वर्तते । सः सम्बन्धः साधारणतया साक्षात्सम्बन्धः । यथा, 'गङ्गा'पदात् 'गङ्गातीरस्य' शाब्दबोधे शक्यार्थगङ्गाप्रवाहेण सह तीरस्य साक्षात्सम्बन्धो वर्तते। परन्तु कदापि शक्यार्थेन सह लक्ष्यार्थस्य परम्परासम्बन्धोऽपि दृश्यते। यथा, द्विरेफादि-पदम्। द्विरेफपदात् प्रथमं तावत् द्विरेफस्य रकारद्वयस्य वा बोधः भवति । यतो हि 'भ्रमरः' इति पदे रकारद्वयं वर्तते । अतो द्विरेफपदेन सह भ्रमरपदस्य सम्बन्धःज्ञायते। अतःपरं भ्रमरपदेन सह भ्रमरपदार्थस्य सम्बन्धः ज्ञायते। ईदृशा शक्यार्थेन सह परम्परासम्बन्धरुपा-लक्षणा लक्षितलक्षणा कथ्यते।

इदानीं नैयायिकाः विचारयन्ति यत्, लक्षणा कुत्र भवेत् ? वाक्ये पदे वा ? उत्तरे नैयायिकैः उक्तं

यत्, वाक्ये लक्षणा न भवति, यतो हि वाक्ये शक्तिः न वर्तते। शक्तिः केवलं पदे एव वर्तते।[१५] मीमांसकाः भिन्नयुक्त्या वाक्ये लक्षणाग्रहणं स्वीकुर्वन्ति । ते वदन्ति यत्, "गभीरायां नद्यां घोषः' इति वाक्ये लक्षणा न स्वीकृते सति एतस्य अर्थबोधो नैव भवति । अस्मिन् क्षेत्रे लक्षणया यदि 'नदी'पदात् 'तीरस्य' बोधो भवति। तर्हि 'गभीरपदम्' अत्र व्यर्थविशेषणम्। यतो हि गभीरपदेन सह तीरस्य अन्वयः नैव भवति। नैयायिकाः वदन्ति यत्, 'गभीरपदम्' अत्र तात्पर्य्यग्राहकः। यतो हि केवलं 'नदी'पदेन गभीरनदीतीरस्य बोधो नैव भवति।

## ❖ वाक्यार्थबोधे सहकारिकारणानि

शब्दसामान्यं प्रति वृत्तिसहकृतपदज्ञानं करणं सत्यपि ईदृशानि अनेकवाक्यानि सन्ति येषाम् अवगमने पदज्ञानातिरिक्तं भिन्नकारणं स्यात् । तत् कारणम् आसत्तियोग्यताकाङ्क्षातात्पर्य-ज्ञानम् । इत्युक्ते आसत्तिज्ञानं, योग्यताज्ञानम्, आकाङ्क्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधस्य सहकारिकारणानि। 'गिरिर्भुक्तमग्निमान् देवदत्तेन' 'बह्निना सिञ्चति' वा इत्यादौ पदज्ञानेन एव शाब्दबोधो न भवति। एतेषाम् अवबोधने पदज्ञानातिरिक्तासत्त्यादेः ज्ञानम् आवश्यकम्।

### १. आसत्तिः

आसत्तेः लक्षणं कृतं भाषापरिच्छेदे '*सन्निधानं तु पदस्यासत्तिरुच्यते*' इति। अत्र 'सन्निधानम्' इत्युक्ते पदद्वयस्य अव्यवधानम् । मुक्तावल्यां ग्रन्थकारेण उक्तं –" *अन्वयप्रतियोग्यनुयोगि-पदयोरव्यवधानम् आसत्तिः।"* अर्थात् अन्वये प्रतियोग्यनुयोगि-स्वरूपपदयोः अव्यवधानमेव आसत्तिः। इदम् आसत्तिज्ञानमेव शाब्दबोधस्य कारणम्।

प्राचीननैयायिकानाम् उपरि उक्तलक्षणे समस्या वर्तते । यदि पदद्वयस्य अव्यवधानमेव आसत्तिः, तर्हि 'गिरिर्भुक्तम् अग्निमान् देवदत्तेन' इत्यत्र शाब्दबोधः किमर्थं न भवति ? यतो हि, अत्र गिरिः भुक्तं च पदद्वयम् अव्यवधाने अस्ति। तथापि अत्र अभ्रान्तजनस्य शाब्दबोधो नैव भवति । अतः ग्रन्थकारेण नव्यनैयायिकानां मतम् उपस्थापितम् – "यत्पदार्थस्य

---

१५. "वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणापि नास्ति।" भाषापरिच्छेदः, पृ. २५९

यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्” इति । आसत्तेः लक्षणं तथा सति ‘गिरिर्भुक्तम् अग्निमान् देवदत्तेन’ इत्यत्र शाब्दबोधो नैव भवति । यतो हि गिरिपदभुक्तपदयोः अन्वयः अपेक्षितो न । यद्यपि ‘गिरिर्भुक्तम् अग्निमान् देवदत्तेन’ इत्यस्याद् वाक्यात् कस्यापि शाब्दबोधः भविष्यति, तदा आसत्तिभ्रमकारणं नतु आसत्तिज्ञानम् इति अवगन्तव्यम् ।

पुनः समस्या वर्तते यत्, केनापि जनेन यदि नीलपटं घटद्रव्यं च अवबोधनार्थं ‘नीलो घटः द्रव्यं पटः’ इति वाक्यं प्रयुज्यते, तर्हि तस्माद् वाक्यात् किं यथार्थशाब्दबोधः भवितुं शक्यते ? अस्य प्रश्नस्य उत्तरे प्रचीननैयायिकाः वदन्ति यत्, ईदृशे स्थले श्रोतुः नीलघटस्य पटद्रव्यस्य च शाब्दबोधो भविष्यति । यद्यपि वक्तुः तादृशं तात्पर्यं नासीत् । तदा तत्र श्रोतुः आसत्तिभ्रमः आसीत्, न तु आसत्तिज्ञानम् । प्राचीनाः वदन्ति यत्, आसत्तिभ्रमात् शाब्दबोधः भ्रमात्मकः भवति, परन्तु नव्यनैयायिकाः वदन्ति यत्, आसत्तिभ्रमात् शाब्दबोधः भ्रमात्मकः न भवति, तादृशः शाब्दबोधः अपि प्रमा । यतो हि आसत्तिभ्रमः भ्रमज्ञानस्य न कारणम् किन्तु योग्यताज्ञानम् ।

पुनः समस्या वर्तते यत्, अनेकविशेषणविशिष्टविशेष्यस्य शाब्दबोधकाले कथम् आसत्तिज्ञानं कारणं भवति ? यथा ‘छत्री कुण्डली वासस्वी देवदत्तः’ इत्यस्मिन् वाक्ये देवदत्तः विशेष्यः । अस्य विशेष्यस्य विशेषणानि यथाक्रमे छत्री, कुण्डली, वासस्वी च । अत्र आपत्तिः वर्तते यत्, अनेकविशेषणपदविशिष्टवाक्यस्य उच्चारणकाले पदानि क्रमानुसारम् उच्चार्यन्ते, एव च श्रोता अपि क्रमानुसारं पदानि शृणोति । स्वाभाविकतया चरमपदश्रवणकाले पूर्वे पूर्वे श्रुतपदानि विनाशप्राप्तानि भवन्ति । अतः पदानाम् अव्यवधानम् आसत्तिज्ञानं वा कदापि न सम्भवति । एवं च तेषां स्मरणमपि कदापि न सम्भवति । एवम् अनेकविशेषणविशिष्टविशेष्यस्य एकाखण्डशाब्दबोधे आपत्तिः दृश्यते ।

उक्तापत्तेः समाधानाय केचन नैयायिकाः वदन्ति यत्, पदानाम् अव्यवधानं न, पदार्थसकलानाम् अव्यवधानमेव आसत्तिः । अनेकविशेषणविशिष्टवाक्यस्थलेऽपि ईदृशस्य आसत्तेः ज्ञाने कापि समस्या न वर्तते । ‘छत्री, कुण्डली, वासस्वी देवदत्तः’ ईदृशे वाक्ये उक्तपदानां क्रमानुसारं श्रावनान्तरं श्रावणानुभवजन्यसंस्कारः क्रमानुसारम् उत्पद्यते । चरमपदस्य श्रावणान्तरं

श्रावणानुभवजन्यस्मरणकाले पूर्वपूर्वपदानां संस्कारः उत्पद्यते । अनन्तरं श्रुतसकलपदानां समूहालम्बनविषयकम् एकं स्मृतिज्ञानं उत्पद्यते । तस्मिन् स्मृतिज्ञाने सकलपदानां स्मरणस्य अव्यवधानं वर्तते । अतः आसत्तिज्ञानेन सकल-विशेषणविशिष्टविशेष्यस्य शाब्दबोधो भवति । उदाहरणं यथा, प्रत्यक्षकाले यथा नानासन्निकर्षद्वारा एकमेव प्रत्यक्षज्ञानम् उत्पद्यते तथा नानासंस्कारद्वारा अनेकपद-विषयकैकाखण्डवाक्यार्थस्य स्मरणम् उत्पद्यते । अस्मिन् क्षेत्रे अनेकपदजन्यसंस्कारेण सह चरमपदस्य वर्णस्य वा अनुभवः अन्यान्यपदविषयक-संस्कारस्य उद्बोधको भवति ।

बहुविशेषणविशिष्टविशेष्यस्य शाब्दबोधकाले खण्डखण्डसंस्कारः कथम् अखण्ड-वाक्यस्य स्मरणं कारयति इति व्याख्यानकाले उदयनाचार्येण 'खले कपोतन्याय'स्य सहायता स्वीकृता । यथा वृद्धायुवशिशुकपोताः एककाले खले पतन्ति । तथैव खण्डखन्डसंस्काराः युगपत् अन्विताः भवन्ति ।

विश्वनाथः पदार्थस्य समूहालम्बनज्ञानं न स्वीकोरति । तस्य मतानुसारं यानि पदानि परस्परसाकाङ्क्षानि तानि पदानि अन्वययोग्यसन्निधानं प्राप्नुवन्ति । अतः एकवाक्यान्त-र्गतखण्डखण्डवाक्यस्य अर्थबोधः प्रथमं भवति, अनन्तरं सम्पूर्णवाक्यस्य अर्थबोधः भवति ।

वैयाकरणसम्प्रदायः उच्चारितानित्यशब्दस्य वाचकरूपेण नित्यस्फोटं स्वीकरोति । अस्मिन् मते वर्णादिशब्दः अनित्यः क्षणिकः च, अतः उच्चारणकाले ते विनष्टाः भवन्ति । अतः तेभ्यः कोऽपि अर्थो न उत्पद्यते । तस्मात् कारणात् वैयाकरणसम्प्रदायः वर्णादेः अरितिक्तवर्णस्फोटादि स्वीकोरति । स्फोटो नित्यब्रह्मस्वरूपः । वर्णात्मकशब्दः स्फोटस्य व्यञ्जको भवति । न्यायमते पूर्वपूर्ववर्णज्ञानजन्यसंस्कारः चरमवर्णस्य अनुभवेन एव पदस्य अर्थबोधो भवति अतिरिक्तपदस्फोटो न स्वीकरणीयः ।

अस्मिन् प्रसङ्गे ग्रन्थकारेण शब्दाध्याहारस्य आलोचना क्रियते । यस्मिन् क्षेत्रे वक्ता पूर्णवाक्यं न उच्चर्य्य केवलं खण्डवाक्यस्य उच्चारणं करोति, तस्मिन् क्षेत्रे वक्तुः तात्पर्य्यानुधावनपूर्वकं योग्यपदस्य अध्याहारं कृत्वा शाब्दबोधः करणीयो भवति, येन केनापि उपायेन पदार्थस्मरणेन शाब्दबोधो न उत्पद्यते । तथा यदि भवति तर्हि येन केनापि प्रमाणेन अर्जितपदार्थज्ञानेन

पदार्थोपस्थितिरेव शाब्दबोधस्य कारणं भवेत्, पदजन्य-पदार्थोपस्थितेः आवश्यकता न स्वीकरणीया भवेत्। किन्तु तथा न भवेत्। केवलं पद-जन्यपदार्थोपस्थितिः एव शाब्दबोधस्य कारणम् । उदाहरणरूपेण, कोऽपि वक्ता यदा 'द्वातम्' इति उच्चरति तदा 'पिधेहि' इति अध्याहारं कृत्वा शाब्दबोधः करणीयो भवति । पुनः 'पुष्पेभ्यः' इति चतुर्थीविभक्तिस्थले शाब्दबोधस्य अनुरोधे क्रियावाचकस्य 'स्पृहयती'ति पदस्य अध्याहारो करणीयः।

## २. योग्यता

योग्यता भवति पदेन सह पदस्य सम्बन्धः । विश्वनाथेन उक्तं –"पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ।" अर्थाद् एकपदार्थे अपरपदार्थस्य सम्बन्धः एव योग्यता । वक्तव्यमिदं यत्, यत्पदार्थे यदपरपदार्थस्य संसर्गो विवक्षितः, तत्पदार्थे तदपरपदार्थस्य संसर्गः एव योग्यता । यथा, 'वह्निना सिञ्चति' इत्यत्र योग्यतायाः अभावात् शाब्दबोधो न भवति।

प्रश्नः उदेति यत्, योग्यता शाब्दबोधस्य कारणं विषयः वा ? योग्यताज्ञानं यदि शाब्दबोधस्य कारणं, तर्हि शाब्दबोधस्य पूर्वमेव योग्यताज्ञानं स्यात्। परन्तु पदेन सह पदस्य सम्बन्धज्ञानं वाक्यार्थज्ञानात्परमेव भवति। तथा यदि भवति तर्हि योग्यताज्ञानं शाब्दबोधस्य न कारणम्। अस्याः आपत्तेः उत्तरं प्राचीननैयायिकाः यच्छन्ति यत्, क्वचित् योग्यतायाः संशयात्मकज्ञानं क्वचिद्वा योग्यतायाः निश्चयात्मकज्ञानं शाब्दबोधस्य पूर्वमेव भवति । विश्वनाथेन पूर्वमेव उल्लिखितं यत्, पदजन्यपदार्थोपस्थितिः शाब्द-बोधस्य व्यापारः । पदजन्यपदार्थस्य उपस्थितिकाले योग्यतानिर्णायकप्रत्यक्षादि-सामग्र्युपस्थिते सति योग्यतायाः निश्चयात्मकज्ञानं सम्भवति। यदि योग्यतानिर्णायक-प्रत्यक्षादिसामग्र्युपस्थिते न सति योग्यतायाः संशयात्मकज्ञानं भवति। अतः शाब्दबोधस्य पूर्वं योग्यताज्ञानस्य उपस्थितौ कापि समस्या नास्ति।

नव्यन्यायमते योग्यताज्ञानं शाब्दबोधस्य न कारणम्, वरम् अयोग्यतायाः निश्चयात्मक-ज्ञानस्य अभावः एव शाब्दबोधस्य कारणम् । अयोग्यतायाः निश्चयात्मकज्ञानं शाब्द-बोधस्य प्रतिबन्धकः । प्रतिबन्धकाभावः कार्यस्य कारणं भवति इति नियमानुसारेण अयोग्यतायाः

निश्चयात्मकज्ञानस्य अभावः शाब्दबोधस्य कारणम् इत्यस्मात् कारणात् योग्यताज्ञानं शाब्दबोधस्य कारणम् न इति। पुनः योग्यताज्ञानं यदि शाब्दबोधस्य कारणं तर्हि योग्यताज्ञानस्य विलम्बेन शाब्दबोधोऽपि विलम्बो भवेत् । पतन्तु तथा न भवति । अतः योग्यतज्ञानं शाब्दबोधस्य न कारणम्।

## ३. आकाङ्क्षा

शाब्दबोधस्य तृतीयसहकारिकारणं तावद् आकाङ्क्षा। आकाङ्क्षायाः लक्षणं कारिकायां कृतं विश्वनाथेन "*यत्पदेन विना यस्य अननुभावकता भवेत्* " इति । अर्थात् यत्पदेन विना यत्पदं शाब्दबोधस्य जनकः भवितुं न शक्यते, तत्पदेन सह तत्पदस्य आकाङ्क्षा वर्तते इति बोध्यम्। मुक्तावल्यामपि विश्वानाथेन अवदत्, 'येन पदेन विना यस्य पदस्य अन्वयः अननुभावकत्वं तेन पदेन सह तस्य आकाङ्क्षा इत्यर्थः" इति।

मुक्तावल्यां विश्वानाथेन दृष्टान्तद्वयं दत्तं, प्रथमतः, उक्तं क्रियापदेन विना कारकपदं अन्वयबोधकस्य जनको नैव भवितुं शक्यते। अतः क्रियापदेन सह कारकपदस्य आकाङ्क्षा स्वीकरणीया । द्वितीयतः, तेन उक्तं प्रकृतिप्रत्ययस्य आनुपूर्वी । आनुपूर्वी तावत् पूर्वपूर्ववर्णविशिष्टचरमवर्णत्वम् । पदे वाक्ये च उभयक्षेत्रे 'आनुपूर्वी' इत्यस्य आवश्यकता वर्तते। 'घटम्' इति पदे 'घट'प्रकृतिः 'अम्'प्रत्ययश्च। अतः 'घटम्' इति पदं न उक्त्वा वाक्यम् इति वदनीयम् । 'घटम्' इति वाक्यं प्रति 'घट'प्रकृतेः 'अम्'प्रत्ययस्य च आकाङ्क्षाज्ञानं कारणम् । अपि च 'घटम्' इत्यस्मिन् शब्दे वर्तते यथाक्रमेण घ्+अ+ट्+अ+म् इत्येतेषां वर्णानाम् आनुपूर्वी। एषः आनुपूर्वी एव आकाङ्क्षा। 'घट'पदात् परम् 'अम्' न स्थिते सति घटपदार्थेन सह कर्मत्वस्य अन्वयबोधो न भवति । तदर्थं 'घट'पदेन सह 'अम्'पदस्य आकाङ्क्षा, एवं च इयमाकाङ्क्षा एव घटकर्मत्वबोधं प्रति कारणम्।

मतान्तरे निकटस्थपदार्थानां जिज्ञासा एव आकाङ्क्षा । 'घटम्' इति कारकपदश्रवणान्तरम् 'आनय'क्रियापदस्य जिज्ञासा भवति। पुनः 'आनय' इति क्रियापदश्रवणान्तरं 'घटम्' इति कारकपदस्य जिज्ञासा भवति । एषा जिज्ञासा एव आकाङ्क्षा । एषा आकाङ्क्षा एव शाब्दबोधस्य कारणम् । परस्परसाकाङ्क्ष्यपदेभ्यरेव समग्रवाक्यस्य आर्थबोधो भवति। येषां

पदानां मध्ये आकाङ्क्षा न विद्यते तेभ्यः पदेभ्यः शाब्दबोधो नैव भवति। यथा, 'गौः पुरुषः' इत्यादि।

## ४. तात्पर्यम्

विश्वानाथेन कारिकायां तात्पर्यस्य लक्षणनिर्णये उक्तं "*वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्*" इति। इत्युक्ते वक्तुः इच्छा एव तात्पर्यम्। शाब्दबोधक्षेत्रे वक्तुरिच्छायाः अभिप्रायस्य वा उपलब्धिः एकान्तावश्यकम्। तथा न सति विवक्षितार्थः क्वचित् न उत्पद्यते। तात्पर्यजानं शाब्दबोधस्य कारणं इति न स्वीकृते सति 'सैन्धवमानय' इति वाक्यात् कदापि 'अश्वानयनस्य' कदापि 'लवणानयनस्य' बोधः भवेत्।

वैयाकरणसम्प्रदायः वदन्ति यत्, यतो हि नानार्थकपदस्थले वाक्यार्थप्रतिपादनं प्रकरणादिना सम्पद्यते, अतः प्रकरणादि एव अस्मिन् क्षेत्रे वाकार्थबोधस्य कारणम्। तदर्थं वाक्यार्थबोधं प्रति तात्पर्यज्ञानं न कारणम् इति युक्तम्। विश्वनाथेन अस्य विरोधितां कृत्वा वदति यत्, यद्यपि प्रकरणादि तात्पर्यज्ञानं प्रति कारणम्, परन्तु वाक्यार्थबोधं प्रति न। प्रकरणादिभ्यः तात्पर्यज्ञानम् उत्पद्यते, वक्तुः तात्पर्यानुसारेणैव श्रोतुः शाब्दबोधः भवति। तथापि कारणं केनापि न वा केनापि धर्मेन अवच्छिन्नं भवेत्। किन्तु प्रकरणादेः तादृशः कोऽपि धर्मः न परिलक्ष्यते। अतः नानार्थकपदस्थले तात्पर्यज्ञानमेव कारणम् न तु प्रकरणादि। तात्पर्यज्ञानं प्रकरणादिद्वारा वाक्यार्थं निर्धारयति।

पुनः प्रश्नः आयाति, वाक्यार्थबोधमात्रं प्रति तात्पर्यज्ञानं कारणं उक्ते सति वेदवाक्यस्थाले कस्य इच्छा तात्पर्यम्, ईश्वरस्य शिक्षकस्य वा? नैयायिकाः अस्मिन् क्षेत्रे ईश्वरस्य तात्पर्यं स्वीकुवन्ति। परन्तु ईश्वरविरोधिप्रतिवादिनः एतत् न स्वीकुर्वन्ति, तेषां मते अध्यापकस्य तात्पर्यस्य उपलब्धिद्वारा एव वेदवाक्यस्य अर्थबोधः सम्भवति। अतः ईश्वरस्वीकारः अयौक्तिकम्। प्रतिवादिनाम् एतद्युक्तिः न ग्रहणीया। यतो हि यदा प्रथमसृष्टिः भवति तदा अध्यापकः न वर्तते। अतः सृष्टिकाले ईश्वरस्य तात्पर्यज्ञानमेव वेदार्थग्रहणे कारणम्। किन्तु प्रतिवादिनः सृष्टेः आद्यावस्थां न स्वीकुवन्ति। यैः प्रलयः सृष्टिः वा स्वीक्रियते ते एव पुनः सृष्टिं स्वीकुर्वन्ति।

वस्तुतः प्रलयः सृष्टिः वा कदापि न भवति । अतः नवसृष्टेः कल्पना वृथा । प्रतिवादिनाम् अस्याः आशंकायाः उत्तरे सिद्धान्तिनः वदन्ति यत्, प्रलयः वेदेन प्रतिपादितः, अतः स्वीकरणीयः ।

शुकपक्षी यदा वेदस्य आवृत्तिं करोति तदा अस्माकं यद् यथार्थज्ञानम् भवति तदानीमपि ईश्वरस्य तात्पर्यज्ञानं कारणम् । शुकवाक्याद्यदि उत्पन्नं ज्ञानम् अयथार्थो भवेत् तदा शुकस्य तात्पर्यज्ञानं कारणम् इति ग्रहणीयम् । यतो हि शिक्षकस्य शुकस्य वा तात्पर्यम् इच्छा वा क्वचित् भ्रान्तः भवितुं शक्यते ।

अन्तिमे विश्वनाथेन एवमपि उक्तं यत्, तात्पर्यविषये उपरि उक्तं मतं न सर्ववादिसम्मतम् । कस्मिन् मते नानार्थकपदजन्यशाब्दबोधस्य क्षेत्रे तात्पर्यज्ञानं कारणं सत्यपि यस्मिन् कस्मिन् वाक्यस्थले तात्पर्यज्ञानं न कारणम् । शुकवाक्यस्थले तात्पर्यज्ञानेन विनापि वाक्यार्थबोधो भवितुं शक्यते । वेदवाक्यस्थले परम्पराक्रमानुसारम् आगतेन प्रामाणिकविचारेण वेदानुग्राहकतर्केन शाब्दबोधः उत्पद्यते ।

*********

# चतुर्थाध्यायः

## दिनकरी-किरणावलीटीकयोः तुलनात्मकसमीक्षा

### * पदपदार्थसम्बन्धः *

१६८ कारिकाः तदुपरि मुक्तावलीटीका एकत्र 'भाषापरिच्छेदः' इति नाम्ना प्रचलितो वर्तते। ग्रन्थेऽस्मिन् शब्दप्रमाणं यत् वर्तते तत्तु न सरलम्। यद्यपि कारिकाः सरलाः परन्तु तासामुपरि मुक्तावलीटीकायाः केषाञ्चन पदानां अवबोधने टीकाग्रन्थानां सहायता ग्रहणीया। अस्मिन् अध्याये शब्दखण्डस्य मूलग्रन्थं पूर्वे संस्थाप्य शब्दप्रमाणावबोधने दिनकरीकिरणावली-टीकयोः तुलनात्मकालोचनेन महत्वपूर्णाः विषयाः उपस्थाप्यन्ते।

***कारिका***

*पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।*
*शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥८१॥*

- **टीकाद्वयस्य तुलना**

१. मुक्तावल्या अस्याः कारिकाया अन्वयपूर्वकं विश्लेषणं किरणावलीटीकायाम् आलोचितम् अभवत्। तत्र वर्तते "मूले-पदज्ञानमिति। 'तु'शब्द एवकारार्थः। तत्र=शाब्दबोधे, पदज्ञानं=पदविषयकज्ञानं, तच्च पदश्रवणे सति पदस्य श्रावणप्रत्यक्षात्मकम्, पुस्तकादौ लिखित-स्मारकरेखांकितपङ्क्तिदर्शने तु रेखादर्शनात्मकोद्बोधकजन्यं पदस्य स्मरणात्मकम्। तदेव करणं भवति। अथ पदार्थधीः=पदज्ञानजन्यं यत्पदार्थस्य ज्ञानं= तद्विषयकस्मरणं, तत् द्वारं=व्यापारो भवति। अथ शाब्दबोधः=शब्दसमूहात्मकवाक्यजन्यो यो वाक्यार्थबोधः सः फलं=प्रमा उच्यते। तत्र=पदजन्यपदार्थस्मरणात्मकव्यापारे, शक्तिधीः=पदेन सह अर्थस्य

सम्बन्धरूपाया वक्ष्यमाणायाः संकेताख्यायाः शक्तेः धीः, सा च शक्तिधीः 'अस्मात्पदादयमर्थो बोद्धव्यः'=एतत्पदजन्यबोधविषयतावानर्थो भवतु' इति पदप्रकारकार्थविशेष्यकेश्वरेच्छात्मक-शक्तिज्ञानरूपा, अत्र स्व(पद)जन्यबोधविषयत्वं पदस्यार्थो सम्बन्धः । अथवा 'इदं पदममुमर्थं बोधयतु'=अर्थविषयकबोधजनकतावत्पदं भवतु' इति अर्थप्रकारकपदविशेष्यकेश्वरेच्छात्मक-शक्तिज्ञानरूपा, अत्र स्व(अर्थ)विषयकबोधजनकत्वम् अर्थस्य पदे सम्बन्धः इति । एतादृशो शक्तिधीः सहकारिणी=सहकारिकारणं भवतीत्यर्थः"[१] इति ।

अपरस्यां दिनकरीटीकायां न केवलं पदज्ञानस्य, अपितु कारिकास्थितस्य कस्यापि पदस्य व्याख्या अत्र न समुपलभ्यते । अतः कारिकामिमम् अवगन्तुं दिनकरीटीका न पर्याप्तम् ।

### *मुक्तावली*

*शाब्दबोधप्रकारं दर्शयति – पदज्ञानं त्विति । नतु ज्ञायमानं पदं करणम् । पदाभावेऽपि मौनि-श्लोकादौ शाब्दबोधात् ।*

## ▪ टीकाद्वयस्य तुलना

१. मुक्तावल्यां 'ज्ञायमानपदं' शाब्दबोधस्य न करणम् इति उक्तं वर्तते । परन्तु ज्ञायमानपदस्य कारणत्वप्रसङ्गः अत्र किमर्थं आगत इति पूर्वप्रसङ्गः तत्र नास्ति । किरणावलीतः अस्माभिः ज्ञातुं शत्यते यत्, प्राचीननैयायिकाः शाब्दबोधस्य करणत्वं ज्ञायमानपदस्य स्वीकुर्वन्ति इति ।[२]

अपरस्यां दिनकरीटीकायां ज्ञायमानपदस्य करणत्वप्रसङ्गे किमपि न आलोचितम् ।

२. ज्ञायमानपदं शाब्दबोधस्य न करणं, यतो हि '*पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात्*' इति । अत्र '*मौनिश्लोकादौ*' इति पदस्य व्याख्याविषये दिनकरी-किरणावलीटीकयोः मध्ये पार्थक्यं वर्तते ।

दिनकरीटीकायां '*मौनिश्लोकादौ*' इति पदस्य व्याख्या वर्तते "मौनिश्लोकदावित्यादिना

---

१. किरणावली, पृ २९१

२. "-------प्राचीनास्तु ज्ञायमानं पदमेव करणमिति वदन्ति तन्निषेधति ।" तदेव

द्वित्वादिबोधकविजातीयहस्तचेष्टादेः संग्रहः"[३] इति।

किरणावल्यां 'मौनिश्लोकादौ' इत्यस्य व्याख्यानं दृश्यते "मौनिश्लोकादौ मौनिकर्तृकवाक्य-बोधकलीप्यादौ मौनतया वाचिते (दृष्टे) लिखितश्लोके, आदिनाद्वित्वादिबोधकाऽङ्गुल्यादि-चेष्टादौ च"[४] इति।

अर्थात् 'मौनश्लोकादि' इति पदं पदद्वयेन निर्मितं , यथा मौनिश्लोक आदि च। दिनकरीटीकायां केवलम् आदिपदस्य व्याख्या क्रियते। परन्तु किरणावल्यां 'मौनिश्लोक'पदस्य 'आदि'पदस्य च भिन्नभिन्व्याख्या क्रियते।

३. इदानीम् एको विषयो लक्षणीयो यत्, यद्यपि पदज्ञानं करणम् इति टीकाद्वयेऽपि स्वीकृतं परन्तु करणं किं, किं तस्य लक्षणम् इत्यादिविषयाः टीकाद्वये कुत्रापि न आलोचिताः वर्तन्ते। अतः पदज्ञानं करणम् इति विषयस्य ज्ञानार्थम् प्रथमं तावत् करणं किं, किं तस्य लक्षणम् इत्यादिविषयानां ज्ञानार्थं टीकाद्वयान्तरं अधीतव्यम्।

### ***मुक्तावली***

*पदार्थधीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिनापदार्थोपस्थितावपि शाब्दबोधा-पत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्बन्धेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः।*

## ▪ टीकाद्वयस्य तुलना

१. किरणावल्यां व्यापारविषये उक्तं वर्तते "व्यापारः=पदार्थधीः, सा च पदजन्यपदार्थस्मरणं= पदज्ञानजन्यपदार्थस्मरणं द्वारमित्यर्थः ॥ पदज्ञानजन्ये'त्यनुपादाने आपत्तिमाह – अन्यथेति। पदज्ञानजन्यत्वाऽनिवेशे, पदार्थज्ञानमात्रस्य व्यापारत्वे इति भावः। पदज्ञानवतः ='घट'पद-स्मरणवतः पुरुषस्य, प्रत्यक्षादिना=चक्षुस्संयोगेन, अनुमानेन, अन्येन, उद्बोधकेन वा, पदार्थस्य घटात्मकपार्थिववस्तुनः उपस्थितौ=ज्ञाने, स्मरणे सत्यपि, 'घट'विषयकशाब्दबोधापत्तिः स्यात्,

---

३. दिनकरी, पृ ३५६

४. किरणावली, पृ २९१

न तु तत्र शाब्दबोधो भवति, कारणं च चक्षुस्संयोगादिजन्यं पदार्थस्मरणात्मकं वर्तते, तथा च कारणे सत्यपि कार्यानुत्पादरूपोऽन्वयव्यभिचारः, अतो न पदार्थस्मरणमात्रं व्यापारः किन्तु पदजन्यपदार्थस्मरणमिति भावः" इति।[५] अत्र विश्लेषणं दृष्ट्वा एव ज्ञायते यत्, व्यापारावगमने एतद् बालानां सुखबोधाय अस्ति।

अपरस्यां दिनकरीटीकायां व्यापारविषये किमपि वक्तव्यं नास्ति । तत्र केवलं मुक्तावल्याः केषाञ्चन व्यापारविषयकपदानाम् अर्थविश्लेषणं क्रियते । यथा, "अन्याथा पदार्थज्ञानमात्रस्य व्यापारत्वे । तत्रापि पदजन्यपदार्थोपस्थितावपि" इति।[६] अत्र मूलविषयः संक्षेपेण वर्तते । अहं मन्ये यत्, अनेन संक्षेपविश्लेषणेन बालानां सुखबोधं सम्यक् न भवति।

२. "*तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात् समवायसम्बन्धेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः*" इत्यस्य ग्रन्थांशस्य किरणावल्या विश्लेषणमपि महत्वपूर्णं वर्तते। अर्थात् अत्र विस्तारितरूपेण अस्य ग्रन्थांशस्य व्याख्या क्रियते। अत्र वर्तते "तद्धटकं पदजन्यत्वं =पदज्ञानजन्यत्वं, वृत्त्या=वृत्तिज्ञानेनेत्यर्थः, सहार्थे तृतीया, तथाच वृत्तिज्ञानसहकृत-पदज्ञाननिष्ठ-सम्बन्धिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयपदार्थज्ञानं व्यापारः इति फलितम्" इति । पुनश्च उक्तं वर्तते "अन्यथेति । वृत्तिज्ञानसहकृतत्वनिवेशे इत्यर्थः घटादिपदात्=घटादिपदज्ञानात्, समवायसम्बन्धेन=समवायसम्बन्धज्ञानसहकृतात्। आकाशस्य स्मरणे जाते सति आकाशविषयकस्यापि शाब्दबोधस्य आपत्तिः स्यात्, वृत्तिज्ञान-सहकृतत्वनिवेशे तु वृत्तिज्ञानसहकृतघटपदज्ञानस्याकाशस्मृतावहेतुतया न आकाशादि-शाब्दबोधापत्तिरिति भावः" इति।[७]

अपरस्यां दिनकरीटीकायां तादृशं विस्तृतविश्लेषणं नास्ति। तत्र केवलम् अस्मिन् प्रसङ्गे वर्तते "अन्यथा वृत्त्येत्यस्यानुपादाने" इति। अनेन मुक्तावल्या अस्य ग्रन्थांशस्य अवबोधनं भवति वा न वा इति संशयो वर्तते

५. किरणावली, पृ २९२

६. दिनकरी,पृ. ३५६

७. प्रागुक्तम्

## मुक्तावली

*वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः । अत्रैव शक्तिज्ञानस्योपयोगः । पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन तत्स्मरणानुपत्तेः । पदज्ञानस्य हि एकसम्बन्धिज्ञानविधया पदार्थोपस्थापक त्वम् ।*

## ▪ टीकाद्वयस्य तुलना

१. पदजन्यपदार्थोपस्थितौ अपि एको विषयः महत्वपूर्णम् वर्तते, तत्तु वृत्तिज्ञानम् । पदजन्यपदार्थोपस्थितौ वृत्त्या पदजन्यत्वं बोध्यम् । पदेन सह पदार्थस्य यः सम्बन्धः सः वृत्तिसम्बन्धः । वृत्तिः द्विधा शक्तिः लक्षणा च । लक्षणावृत्तिः किमर्थं स्वीक्रियते तत्प्रसङ्गे दिनकरीटीकायाम् किरणावलीटीकायाम् च उक्तं वर्तते यत्, यदि केवलं शक्तिः एव वृत्तिः तर्हि गंगापदात् तीरस्य बोधो न स्यात् । यतो हि, गंगापदस्य तीरे शक्त्यभावो वर्तते । अतः लक्षणा वृत्तिः स्वीकरणीया । दिनकर्य्यां वर्तते "ननु वृत्तिर्यदिशक्तिस्तदा गङ्गापदात्तीरादेर्बोधो न स्यात् तत्र शक्त्या पदजन्यतीरोपस्थितेरभावादत आह वृत्तिश्चेति" इति ।[८]

अपरस्यां किरणावल्यां वर्तते "ननु वृत्तिः यदि शक्तिमात्रं, तदा गंगापदस्य तीरे शक्त्यभावेन वृत्तिज्ञानसहकृतगंगापदज्ञानजन्यतीरस्मृतेरभावाद् गंगापदज्ञानात् तीरविषयकशाब्दबोधो न स्यादित्यत आह- वृत्तिश्चेति"[९] इति । इत्युक्ते लक्षणास्वीकरणे उभयस्याः टीकायाः सादृश्यं लक्ष्यते ।

२. का नाम वृत्तिः ? मुक्तावल्याम् उक्तं वर्तते '*वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः*' । यद्यपि एतस्य वाक्यांशस्य विश्लेषणं दिनकरीटीकायां किमपि न वर्तते । परन्तु किरणावलीटीकायाम् अस्य वाक्यांशस्य विश्लेषणं दृश्यते । तत्र उल्लिखितं वर्तते 'वृत्तित्वं शाब्दबोधानुकूलसम्बन्धत्वम् । शक्तिलक्षणान्यतरसम्बन्धः= शक्तिलक्षणा-त्वान्यतरविशिष्टसम्बन्ध एव बोध्यः'[१०] इति ।

३. शक्तिज्ञानस्य उपयोगविषये मुक्तावल्याम् उक्तं वर्तते यत्, पदस्य शक्तिज्ञानेन 'एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकं भवति' इति नियमानुसारेण पदार्थस्य स्मरणं भवति । किरणावल्याम् अयं

---

८. दिनकरी, पृः ३५७

९. किरणावली, पृः २९२

१०. तदेव

विषयः उदाहरणेन सह व्याख्यायते। तत्र वर्तते "एकसम्बन्धिज्ञानविधया= एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकं भवती'तिनियमेन पद-तदर्थयोः सम्बन्धिनोः मध्ये पदात्मकैकसम्बन्धिज्ञानविधया पदार्थात्मकऽपरसम्बन्धिनः स्मरणजनकत्वं भवतीति, यथा हस्तिनोः हस्तिपकस्य च आधाराधेयभावसन्बन्धवत्त्वेऽपि हस्तिदर्शनस्यैव हस्तिपकस्मारकत्वं भवति, तथा पद-तदर्थयोः शक्तिलक्षणान्यतरसम्बन्धज्ञानसत्त्वेऽपि पदश्रवणान्तरमेवार्थस्मरणस्यानुभविकत्वाद् वृत्त्यात्मकसम्बन्धज्ञानस्यैव सम्बन्धिज्ञानविधया पदज्ञानविधया च पदज्ञानस्यापि हेतुत्वमावश्यकमिति भावः"[११]इति।

यद्यपि दिनकरीटीकायां अस्मिन् विषये किमपि न आलोचितम्। केवलं तत्र मुक्तावल्याः 'अत्रैव' इत्यस्य विश्लेषणं 'पदजन्यपदार्थोपस्थितावेव' इति कृतं वतते। अर्थात् पदजन्यपदार्थोपस्थितौ एव शक्तिज्ञानस्य उपयोगः भवति। अतः उक्तं शक्यते यत् एतद् अपि बालानां सुखबोधाय न वर्तते।

*****

११. किरणावली, पृः २९३

# * शक्तिः शक्तिग्रहोपायाश्च *

## मुक्तावली

*शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा । आधुनिके नाम्नि शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्त्वात् । आधुनिकसङ्केतिते तु न शक्तिरिति सम्प्रदायः । नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव, तेनाधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः ।*

- **टीकाद्वयस्य तुलना**

१. मुक्तावल्याम् उक्तं वर्तते '*शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः*' इत्यत्र 'शक्तिश्च' इत्यस्मिन् पदे 'च'कारस्य अर्थः लक्षणा । किरणावल्याम् उक्तं वर्तते – 'चकारेण लक्षणासंग्रहः, तथा च – शक्तिः लक्षणा च पद-तदर्थयोः सम्बन्धो बोध्यः इत्यर्थः ।'[१] अर्थात् अर्थनिरूपिता या वृत्तिः सा शक्तिः लक्षणा च इत्यर्थः ।

अपरस्यां दिनकरीटीकायां 'च'कारप्रसङ्गे काऽपि व्याख्या न दृश्यते ।

२. "*सा चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा*" । इत्यत्र ईश्वरेच्छा एव शक्तिः । किरणावलीटीकायां ईश्वरस्य इच्छाया द्विधा प्रकारः उल्लिख्यते ।

१. पदप्रकारकार्थविशेष्यिका ।

२. अर्थप्रकारकपदविशेष्यिका ।

प्रथमप्रकारेच्छायाः आकारः '**अस्मात्पदादयमर्थो बोध्यव्यः**' इति । अर्थात् 'एतत्पदजन्यबोधविषयतावानयमर्थो भवतु' इत्याकारिका पदप्रकारिकाऽर्थविशेष्यिकेश्वरेच्छा शक्तिः ।

द्वितीयप्रकारेच्छायाः आकारः '**इदं पदमिममर्थं बोधयतु**' इति । अर्थात् 'एतदर्थविषयक-बोधजनकतावदिदं पदं भवतु' इत्याकारिका अर्थप्रकारकाविशेष्यिकेश्वरेच्छा[२] शक्तिः ।

---

१. किरणावली, पृ. २९३

२. तदेव, पृ. २९४

दिनकरीटीकायाम् ईश्वरस्य इच्छायाः तादृशविभागः कोऽपि न व्याख्यायते।

३. '*आधुनिके नाम्नि शक्तिरस्त्येव*' इत्यत्र 'आधुनिकनाम' इत्यस्य विश्लेषणं दिनकरीटिकायां वर्तते 'आधुनिकैः पित्रादिभिरेकादशेऽहनि सङ्केतिते नाम्नि"[३] इति। अर्थात् आधुनिकपुरुष-पित्रादिभिः दत्तं नाम इति। तादृशे नाम्नि अपि ईश्वरेच्छा वर्तते। यतो हि, श्रुतिः वर्तते 'एकादशेऽहनि पिता नाम कुर्याद्' इति।

परन्तु अस्यां श्रुतौ ईश्वरेच्छा कथम् वर्तते इत्यस्य व्याख्या किरणावलीटीकायां वर्तते। तत्र वर्तते "ईश्वरेच्छासत्तबोधिकां श्रुतिमाह- 'एकादशेऽहनि पिता(पुत्रस्य) नाम कुर्यादि'ति। एकादश-कालीनपुत्रबोधकनामत्वावच्छिन्नोच्चारणकर्ता पिता इति श्रुतिवाक्यार्थः। तथा च तत्र चैत्रपदत्वादिना पुत्रे भगवदिच्छारूपशक्त्यभावेऽपि 'एकादशकालीनपित्रुच्छारितशब्दजबोध-विषयः पित्रादिसंकेतिविषयः(पुत्रः) भवतु'इत्याकारकभगवदिच्छाया एकादशकालीनपितृ-कर्तृकोच्चारणजन्यनामतात्मकसामान्यरूपेण पुत्रे उक्तश्रुत्या सत्त्वप्रतिपादनात् पुत्रस्य तादृश-पित्रुच्चरितपदशक्यत्वमस्त्येवेति भावः"[४] इति।

अत्र अहं मन्ये यत्, अस्य ग्रन्थांशस्य अवबोधने दिनकरीटीकायाः विश्लेषणं सरलं संक्षेपं स्पष्टं च। अतः दिनकरीटीकायाः विश्लेषणमिदं बालानां सुखबोधाय भवतीति।

४. '*आधुनिकसङ्केतिते तु न शक्तिरिति सम्प्रदायः*' मुक्तावल्याः अस्य ग्रन्थांशस्य व्याख्या दिनकरीटीकायां स्वल्पमेव क्रियते। तत्र केवलं 'आधुनिकसङ्केतिते तु' इत्यस्य विश्लेषणं 'आधुनिकमात्रसङ्केतिते नदीवृद्ध्यादिपदे तु'[५] इति कृतं वर्तते। तत्र 'मात्र'शब्दः व्यवह्रियते। यतो हि पूर्वमेव उक्तं यत्, एकादशे अहनि पित्रा उच्चारिते नाम्नि अपि ईश्वरस्य शक्तिः वर्तते। अवशिष्टे सर्वस्मिन् क्षेत्रे केवलम् आधुनिकपुरुषस्य इच्छाशक्तिः स्थास्यति इत्यिदं वचनं स्पष्टतया अवबोधनाय अत्र 'मात्र'शब्दः व्यवह्रियते।

अपरस्यां किरणावलीटीकायां 'आधुनिकसङ्केतः' इत्युक्ते किम्? तेषु शक्तिः न स्थीयते चेत् कथं शाब्दबोधो भवति इत्यादिविषयो विस्तारेण आलोच्यतः। तत्र वर्तते "ननु-'यूस्त्र्याखौ

---

३. दिनकरी, पृ. ३५८

४. किरणावली, पृ. २९५

५. प्रगुक्तम्, पृ. ३५९

नदी' 'इको गुणवृद्धी'त्यादौ आधुनिक(वैयाकरणादि)मात्रसंकेतित नदीवृद्धादिपदानां शक्तिर्न स्यात् तत्र 'नदी'पदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छाया वैयाकरणाद्यभिमतार्थे अभावात्, इत्याशंक्य इष्ट्यापत्त्या परिहरति-आधुनिकसंकेतिते त्विति । आधुनिकमात्रसंकेतित'नदीवृद्धादि'पदे तु न शक्तिः= न ईश्वरेच्छाऽङ्गीक्रियते इत्यर्थः । तर्हि नद्यादिपदात् कथं शाब्दबोध इति चेत् ? शक्तिभ्रमादेवेति गृहाणेति- साम्प्रदायिका वदन्ति"[६] इति।

५. इच्छामात्रमेव शक्तिः चेत् तत्रापि व्यभिचारः इति दिनकरीटीकायां किरणावलीटीकायाम् च उल्लिख्यत। यतो हि 'इदं पदममुमर्थं बोधयतु' ईदृशशक्तिः अपभ्रंशगगर्यादिपदे अपि स्यात्। एवं सति अपभ्रंशगर्ग्यादिपदादपि शाब्दबोधः भवतु । परन्तु अपभ्रंशगगर्यादि- पदात् शाब्दबोधो न भवति। अस्याः समस्यायाः समाधानं टीकाद्वयेऽपि क्रियते। दिनकरीटीकायां केवलमुक्तं वर्तते यत्, ''मतद्वयेप्यपभ्रंशात्मकगर्ग्यादिपदे शक्ति- भ्रमादेव बोधः इत्येवधेयम् "[७] इति । परन्तु किरणावलीटीकायाम् शक्तिभ्रमात् कथम् अपभ्रंशपदात् शाब्दबोधः भवति, इच्छात्मिकाशक्तेः स्वरूपं कीदृशं भवेत् इत्यादि विस्तारेण व्याख्यायत[८]।

## मुक्तावली

*शक्तिग्रहस्तु व्याकरणादितः। तथाहि- "शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।*
*वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा॥"*

६. किरणावली, पृ. २९५

७. दिनकरी, पृ. ३५९

८. "वस्तुतस्तु-'नापभ्रंशितवै'इति- श्रुत्वा 'साधुनेव प्रयुञ्जीत'- इति व्याकरणेन च अपभ्रंशशब्दानां प्रयोगनिषेधस्य, साधुशब्दप्रयोगे च फलातिशयस्य दर्शितत्वाद्, गगर्याद्यपभ्रंशादिशब्दव्यावृत्ता शक्तिः 'अस्मात्साधुशब्दादयमर्थो बोद्धव्य'इतीच्छैव वक्तव्या, एवं च 'गगर्यादिशब्दादयमर्थो बोद्धव्य'-इतीच्छासत्त्वेऽपि 'साधुपदज्ञानजन्यबोधविषयतात्ववच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन 'गगर्यादिशब्दादयमर्थो बोद्धव्यः' इतीच्छायाः कुत्राऽप्यवर्तमानतया न तस्याः शक्त्यात्मकत्वं , किन्तु गगर्यादिशब्दानां साधुपदत्व- भ्रान्तिमतः पुरुषस्य साधुपदज्ञानघटितविशेष्यतासम्बन्धेन निरुक्तेच्छावत्त्वभ्रमरूपशक्तिभ्रमसंभवात् तस्यैव गगर्यादिशब्दाच्छाब्दबोधो नान्यस्येति –नवीनमतमेव युक्तमिति बोध्यम्।" प्रागुक्तम्, पृ. २९५

## ■ टीकाद्वयस्य तुलना

१. मुक्तावल्यां शक्तिग्रहविषये या प्राचीना कारिका वर्तते तस्या अन्वयपूर्वकं विश्लेषणं किरणावल्यां क्रियते । तत्र वर्तते "व्याकरणम्=अष्टप्रस्थानमिन्द्रादिप्रणीतं शब्दशास्त्रम्, उपमानं=सादृशज्ञानात्मकप्रमाणम्, कोषः=अमरकोषनिघण्ट्वादिः, आप्तवाक्यं=प्रयोगहेतुभूत-यथार्थज्ञानवत्पुरुषोच्चारितवाक्यम्, व्यवहारः=शब्दप्रयोगः, प्रयोज्यवृद्धमुद्दिश्य उत्तमवृद्धादि-कृतो 'गामानये'त्यादिरूपः, चेष्टाद्यात्मकश्च, वाक्यस्य शेषः=प्रकृतवाक्यातिरिक्ते वाक्ये प्रकृतवाक्यार्थबोधोपयोगी पदकदम्बोऽर्थवादाद्यात्मकः, विवृतिः=विवरणम्-पर्यायादिकम्, सिद्धपदस्य सान्निध्यं=प्रसिद्धपदस्य सन्निद्धिः । एतान्यष्टौ शक्तज्ञानस्य प्रयोजकानि भवन्तीति वृद्धा मन्यन्ते"[९] इति । अर्थात् किरणावल्याः विश्लेषणतः अस्माकं एका सार्विकधारणा कारिकाया अस्याः भवितुं शक्यते ।

अपरस्यां दिनकरीटीकायाम् अस्याः कारिकायाः तादृशं विश्लेषणं किमपि नास्ति ।

### मुक्तावली

*धातु-प्रकृतिप्रत्ययादीनां शक्तग्रहो व्याकरणाद् भवति । क्वचित् तु सति वाधके त्यजते । यथा-वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते । चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः । तच्च गौरवात् त्यज्यते । किन्तु कृतौ शक्तिर्लाघवात् । कृतिश्चैत्रादौ प्रकारीभूय भासते ।*

## ■ टीकाद्वयस्य तुलना

'व्याकरणात् शक्तिग्रहः' इति विषयमाधारीकृत्य अधुना टीकाद्वयस्य तुलना क्रियते ।

१. 'व्याकरणात् शक्तिग्रहः' इति विषयस्य उदाहरणं दिनकरीटीकायां स्वल्पवाक्येन स्पष्टतया उक्तं वर्तते । यथा, 'व्याकरणादिति । भू सत्तायां वर्तमाने लडित्यादिव्याकरणादित्यर्थः ।[१०]' इति । अर्थात् भूधातोः सत्तार्थे, लट्-लकारस्य वर्तमानकालार्थे शक्तिग्रहः व्याकरणाद् भवति ।

---

९. किरणावली, पृ. २९६

१० . दिनकरी, पृ. ३५९

अपरस्यां किरणावलीटीकायां बहूदाहरणेन सह सूत्रोल्लेखपूर्वकं 'व्याकरणात् शक्तिग्रहः' इति विषयस्य अवबोधनं क्रियते । यथा, "वर्तमाने लट्-इत्यत्र लट्प्रत्ययानां वर्तमानरूपार्थे शक्तिग्रहः । 'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यादिव्याकरणबलाद् आख्यातस्य 'ति'प्रभृतेः कर्तरि शक्तिग्रहः । विभक्तीनाम् आश्रयाद्यर्थे शक्तिग्रहः"[११] इत्यादि । इत्युक्ते सूत्रवृत्तिवार्तिकाद्यात्मकव्याकरणशास्त्रात् शक्तिग्रहो जायते इति किरणावलीतः ज्ञातुं शक्यते ।

२. "वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते" इति विषयस्य विश्लेषणं सूत्रोल्लेखपूर्वकं किरणावल्यां क्रियते । आख्यतस्य कर्तरि शक्तिस्वीकरणे व्याकरस्य सूत्रं क्रियते 'लः कर्मणि च भावे चाऽकर्मकेभ्यः' इति । अस्य सूत्रस्य व्याख्या किरणावल्यां सुन्दरतया क्रियते ।[१२]

अपरस्यां दिनकरीटीकायाम् एतादृशं विश्लेषणं किमपि नास्ति । अतः 'वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते' इति विषयस्य अवबोधने किरणावल्याः महत्त्वपूर्णा भूमिका वर्तते ।

३. 'चैत्रः पचती'त्यादिस्थले वैयाकरणानां मतं नैयायिकाः न स्वीकर्वन्ति । तथा स्वीकृते सति गौरवदोषो भवति । मुक्तावल्यां गौरवः कथं भवति तस्य कापि व्याख्या नास्ति, तथा दिनकरीटीकायामपि । परन्तु किरणावलीटीकायाम् एतस्य व्याख्या क्रियते । यथा, "कर्तृत्वं हि कृतिमत्त्वं, तथा च कृतिमतः शक्यत्वे, कृतिः शक्यतावच्छेदिका प्रतिकर्तृ भिन्ना भिन्ना-इति शक्यतावच्छेदकधर्माणामानन्त्यमेव उपस्थितिकृतगौरवमिति भावः"[१३] इत्यस्मात् कारणात् वैयाकरणस्य आख्यातस्य कर्तरि शक्तिः गौरवात् त्यजते ।

४. नैयायिकानां मतम् अस्ति यत्, '*कृतौ शक्तिर्लाघवात्*' इति । परन्तु कथं कृतौ शक्तिः स्वीकृते सति लाघवो भवतीत्यस्य व्याख्याकाले दिनकरीटीकायाम् उक्तं वर्तते यत्, "कृतित्वजातेः शक्यतावच्छेदकत्वे लाघवादित्यर्थः" [१४]इति । अर्थात् कृतित्वजातिः शक्यतावच्छेदको भवति चेत् लाघवो भवति ।

---

११ . किरणावली, पृ. २९६

१२. "चैत्रः पचती'त्यादिवाक्ये, आख्यातस्य='तिबा'दिप्रत्यस्य, कर्तरि=कर्तृरूपेऽर्थे शक्तिरुच्यते इत्यर्थः । अयं भावः- 'लः कर्मणि च भावे चाकर्मकेभ्यः' – इति सूत्रे 'कर्तरि कृदि'तिसूत्रस्थं 'कर्तरी'तिपदमनुवर्तते, तथा च 'सकर्मकेभ्यो धातुभ्यो लकाराः कर्तृवाचकाः कर्मवाचकाः स्युरित्यर्थः, ---------------। एवम्- 'अकर्मकेभ्यो धातुभ्यो लकाराः कर्तृवाचकाः भाववाचकाः भवन्तीत्यर्थः, भाववाचकत्वमित्यस्य निरर्थकत्वमित्यर्थः, -------------------।" तदेव, पृ.२९७

१३. तदेव

१४ . दिनकरी, पृ.३६०

अपरस्यां किरणावलीटीकायां विस्तृतरूपेण व्याख्या क्रियते । तत्र वर्तते- "किन्तु लाघवात्= नानाकृतिष्वनुगतायाः कृतित्वजातेः किञ्चिदविशेषितायाः शक्यतावच्छेदकत्वे उपस्थितिकृत-लाघवात्, कृतौ=कर्तृनिष्ठप्रयत्ने, आख्यातस्य शक्तिःस्वीकार्येत्यर्थः । जातेरेव स्वरूपतो भानाऽभ्युपगमने कृतेः स्वरूपतः शक्यतावच्छेदकत्वाऽसंभवात् कृतित्वविशिष्टाऽनन्तकृतीनां शक्यतावच्छेदकत्वे परमगौरवमिति भावः"[१५] इति ।

## मुक्तावली

*न च कर्तुरनभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्, कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् । संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः । कर्मत्वादीत्यस्येतरविशेषणत्वेन तात्पर्यविषय-त्वमर्थः । तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः । यत्र कर्मादौ न विशेषणत्वं प्रथमदलार्थः । तेन चैत्र इव मैत्रो गच्छतीत्यादौ चैत्रादेर्वारणम् । स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय द्वितीयदलम् । तस्य द्वितीयान्त-पदोपस्थाप्यत्वाद् वारणमिति ।*

*एवं व्यापारेऽपि न शक्तिर्गौरवात् । रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा । जानातीत्यादौ त्वाश्रयत्वे, नश्यतीत्यादौ तु प्रतियोगित्वे निरूढलक्षणा ।*

*उपमानाद् यथा शक्तिग्रहतथोक्तम् ।*

## ▪ टीकाद्वयस्य तुलना

१. 'चैत्रः पचती'त्यत्र 'ति' आख्यातेन प्रयन्तः कृतिः वा अभिहियते, न चैत्रः । अतः चैत्रः इति पदे अनभिहिते तृतीया भवतु इति आशंकां निराकरोति "*न च कर्तुरनभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्*" इति । परन्तु कथं तृतीया भवति इत्यादिविषया किरणावल्यां सरलतया सूत्रोल्लेखपूर्वकं व्याख्यायते । तत्र वर्तते "वैयाकरणः शंकते – न च कर्तुरिति । 'अनभिहिते'(२/३/१) इत्यधिकारसूत्रोत्तर-पठितेन 'कर्तृकरणयोस्तृतीया'(२/३/१८) इत्यनुशासनेन अनभिहिते कर्तरि तृतीयाविधानात् न्यायमते कर्माख्यातेन कृतेरेवाऽभिहितत्वेन कर्तुः अनभिधानात्=आख्यातवाच्यत्वाऽभावात् 'चैत्रः पचती'त्यादौ वक्तव्ये कर्तृबोधार्थे

१५. किरणावली, पृ.३९७

तृतीयापत्त्या 'चैत्रेण पचती'त्येव प्रयोगः स्यात् न तु 'चैत्रः पचती'ति प्रयोग इति भावः"[१६] इति।

अपरस्यां दिनकरीटीकायाम् उक्तं वर्तते- "अनभिहिते इत्यधिकारीयेन कर्तृकरणयोस्तृतीयेत्यनेनानभिहितकर्तरि तृतीयाविधानादिति भावः"[१७] इति । अत्र दृश्यते, मुक्तावल्याः '*नच कर्तुरनभिधानादि*'त्यादिग्रन्थांशस्य तादृशं स्पष्टता दिनकर्य्यां नास्ति, यथा किरणावल्यां वर्तते।

२. उपमानात् शक्तिग्रहः कथं भवति तस्य विश्लेषणं किरणावल्यां सरलभाषया वर्तते। तत्र वर्तते "उपमानप्रमाणं यत्, 'गोनिरूपित-गवयनिष्ठसादृश्यप्रत्यक्षम्, तस्मात् 'गवयो गवयपदवाच्य' इति शक्तिग्रहो भवति'[१८] इति।
अपरस्यां दिनकरीटीकायां शब्देखण्डे 'उपमानात् शक्तिग्रहः' इति विषयस्य व्याख्या कापि नास्ति। यद्यपि उपमानखण्डे विश्लेषणं वर्तते।

## मुक्तावली

*एवं कोशादपि शक्तिग्रहः । सति वाधके क्वचित्त्यजते । यथा नीलादिपदानां नीलरूपादौ नीलविशिष्टे च शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिः नीलादिविशिष्टे तु लक्षणेति।*

## ▪ *टीकाद्वयस्य तुलना*

१. मुक्तावल्याम् उक्तं वर्तते यत्, कोशादपि शक्तिग्रहो भवति। परन्तु कथं केषां वा भवति ? तस्य व्याख्यानं किरणावल्याम् उक्तं वर्तते । "स्वसमानार्थबोधकशब्दसमुहात्मकात् अमरसिंहादिकोशात् 'पिताम्बरोऽच्युतः शाङ्गी'त्यत्र पिताम्बरादिशब्दस्य श्रीकृष्णपरमात्मनि शक्तिग्रहः।[१९]

अन्यत्र दिनकरीटीकायां तादृशं व्याख्यानं किमपि नास्ति।

---

१६. किरणावली, पृ.२९८
१७. दिनकरी, पृ. ३६०
१८. प्रागुक्तम्, पृ. ३०२
१९. तदेव, पृ. ३०३

२. *'नीलादिपदानां नीलरूपादौ नीलविशिष्टे च शक्तिः कोशेन व्युत्पादिता'* इति मुक्तावल्यामुक्तं वर्तते। परन्तु केन कोशेन एवं व्युत्पादितं तत्तु अस्माभिः किरणावलीतः ज्ञातुं शक्यते। तत्र स्पष्टरूपेण उल्लिखितं –'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति अमरसिंहकृतनाम-लिंगानुशासनेन व्युत्पादिता।'[२०] लिंगानुशासनस्य अस्य वाक्यांशस्य सरलार्थमपि किरणावल्यां प्राप्यते –'गुणवाचकशुक्लादिशब्दानां पुल्लिंगत्वस्य गुणि(घटादि)वाचक-शुक्लादिशब्दानां गुणिलिंगत्वस्य च प्रतिपादनद्वारा गुणवाचकत्वगुणिवाचकत्वयोरपि प्रतिपादनादिति भावः'[२१] इति।

अपरस्यां दिनकरीटीकायां केवलं 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति कोशस्योभयत्र शक्तिग्रहकत्वादिति भावः' इति उल्लिखितम्। परन्तु एतत् कुत्र प्राप्यते, एतस्य सरलार्थः इत्यादि किमपि न लभ्यते।

३. कोशेन व्युत्पादिता ईदृशा शक्तिः लाघवात् नीलादौ एव शक्तिग्रहो ग्रहणीयो, न तु नीलादिविशिष्टे द्रव्ये इति मुक्तावल्यामुक्तं वर्तते। परन्तु कथं ? तस्य व्याख्या दिनकरीटीकायां यद्यपि संक्षेपेण कृता वर्तते, परन्तु किरणावल्यं सुन्दरतया कृता वर्तते। उभयत्र व्याख्या क्रियते यत्, नीलत्वजातिरेव शक्यतावच्छेदकधर्मः। अतः नीलादिशब्दस्य शक्तिः नीलादौ एव ग्रहणीया। [२२] नीलादिविशिष्टे तु लक्षणा।

### मुक्तावली

*एवम् आप्तवाक्यादपि। यथा 'कोकिलः पिकपदवाच्य' इत्यादिशब्दात्पिकादिपदानां कोकिले शक्तिग्रहः।*

---

२०. किरणावली, पृ. ३०३

२१. तदेव

२२. "नीलादिमतां शक्यत्वे शक्यतावच्छेदकं नीलादिमत्त्वं=नीलादय एवेति ते अनन्ता इति महद्गौरवं, तदपेक्षया नीलादीनामेव शक्यत्वे नीलत्वादिकं स्वरूपतः शक्यतावच्छेदकं स्यादिति तत् शरीरकृतमुपस्थितिकृतं च परं लाघवं भवतीति नीलादिशब्दानां नीलाद्यर्थे एव शक्तिः"। तदेव
" नीलादिमत्त्वापेक्षया नीलात्वादिजातेर्लघुतया शक्यतावच्छेदकत्वादिति भावः।" दिनकरी, पृ ३६७

## ▪ टीकाद्वयस्य तुलना

१. किरणावल्याम् 'आप्तः' इत्यस्य अर्थः उच्यते 'प्रयोगहेतुभूतयथार्थज्ञानवान् आप्तः' इति । अर्थात् शाब्दप्रयोगस्य हेतुभूतो यो यथार्थज्ञानवान् सः एव यथार्थः । आप्तवाक्यात् शक्तिग्रहव्यापारे किरणावल्यां वर्तते- "प्रयोगहेतुभूतयथार्थज्ञानवान् आप्तः, तदुच्चरितवाक्य-श्रवणादपि शक्तिग्रहो भवति, यथा कोकिलः पिकपदवाच्य'इत्याप्तवाक्येन 'पिक'पदस्य अर्थम् अजाननस्य बालस्य 'पिक'पदस्य कोकिलात्मकेऽर्थे शक्तिग्रहो भवतीति"[२३] इति । मुक्तावल्याः 'आप्तवाक्यादपि' इत्यस्य अवगमने किरणावल्याः 'आप्तः' इत्यस्य विश्लेषणं महत्वपूर्णं वर्तते।

अपरस्यां दिनकरीटीकायाम् 'आप्तवाक्यात् शक्तिग्रहः' इति विषये किमपि वक्तव्यं नास्ति।

### मुक्तावली

*एवं व्यावहारादपि । प्रयोजकवृद्धेन घटमानयेत्युक्तं, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्यपार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्यमित्य- वधारयति । ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्या- न्वितघटादौ शक्तिं गृह्णाति । इत्थं च भूतले नीलो घट इत्यादिशब्दान्न शाब्दबोधः । घटादिपदानां कार्यान्वितघटा- दिबोधे सामर्थ्यावधारणात् कार्यताबोधं प्रति च लिङ्गा- दीनां सामर्थ्यात्तदभावान्न शाब्दबोध इति केचित् । तन्न । प्रर्थमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्या- गौचित्यात् । अतएव चैत्र! पुत्रस्ते जातः, कन्या ते गर्भिणीत्यादौ मुखप्रसादमुख- मालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति । तथाच व्यभिचारान्न कार्यान्विते शक्तिः । न च तत्र तं पश्येत्यादि-शब्दान्तरमध्याहार्यं मानाभावात् । चैत्र! पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च । इत्थं च लाघवादन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति ।*

## ▪ टीकाद्वयस्य तुलना

१. 'व्यावहारादपि शक्तिग्रहः' इति विषये किरणावलीतः ये विषयाः प्राप्यन्ते ते प्रथमतः, व्यवहारः इत्युक्ते 'घटमानयेत्यादिशब्दप्रयोगात्मकः'[२४] तेनापि गोपदार्थमजानानस्य बालस्य शक्तिग्रहः

---

२३. किरणावली, पृ.३०३

२४. तदेव

भवति । अर्थात् स्पष्टरूपेण किरणवल्याम् उक्तं वर्तते यत् व्यवहारात् केवलं बालस्य शक्तिग्रहः भवति इति ।

द्वितीयतः, मुक्तावल्याः व्यवहारादपि शक्तिग्रहः इति विषये ये अंशाः सन्ति तेषां सर्वेषाम् विश्लेषणं वर्तते ।

तृतीयतः, 'कार्यान्वितघटादौ शक्तिः गृहीता भवति' इति प्रभाकरसम्प्रदायस्य मतम् इति अस्माभिः किरणावलीतः ज्ञातुं शक्यते ।[२५]

अपरस्यां दिनकरीटीकायां अस्मिन् विषये मुक्तावलीस्थानां सकलपदानां विश्लेषणं नास्ति । कार्यान्वितपदानाम् अनुभाविकीशक्तिविषये दिनकरीटीकायामुक्तं वर्तते 'ननु व्यवहारेणानयनादिनानुमितघटादिधार्मिककार्यज्ञाने पदानां कारणत्वं लाघवात्पदत्वावच्छेदेनैव गृहीतम् । एवंच साक्षात्परम्परया वा कार्यत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रति पदत्वेनकारणतेति कार्यकारणभावः पर्यवसितः । इयमेव कार्यान्विते पदानामानुभाविकी शक्तिः ।[२६]

**मुक्तावली**

*एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः कङ्गौ च म्लेच्छानाम् । तत्र हि "यदान्या औषधयो म्लायन्तेऽथैते मोदमाना- स्तिष्ठन्ति"। "वसन्ते सर्वसस्यानां जायते पत्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिन"। इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते कङ्गौ तु शक्तिभ्रमात् प्रयोगः । नानाशक्तिकल्पने गौरवात् । हर्यादिपदे तु विनिगमकाभावान्नाना- शक्तिकल्पनम् ।*

## ▪ टीकाद्वयस्य तुलना

१. किरणावलीटीकायां 'वाक्यशेषादपि शक्तिग्रहः' इत्यस्य वाक्यस्य विश्लेषणं प्राप्यते । तत्र वर्तते 'अवशिष्टवाक्यजन्यशाब्दबोधादपि प्रयोजकात् प्रकृतवाक्यस्थपदानां स्वार्थे शक्तिग्रहः भवतीत्यर्थः।'[२७]

---

२५. किरणावली, पृ.३०३

२६. दिनकरी, पृ. ३६८

२७. प्रागुक्तम्, पृ. ३०७

‘यवमयचरुर्भवति’ इति श्रौतवाक्यस्य विश्लेषणमपि प्राप्यते । यथा ‘यवमय’इति यवशब्दस्य उत्तरं विकारार्थे मयट् प्रत्ययः अभवत्, इतोऽपि चरुः इत्युक्ते एकप्रकारको हविविशेषः इत्यादि ।

यवशब्दस्य अर्थः दीर्घशूकः इति अवबोधनार्थं मुक्तावल्याः ‘यदान्या औषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति’’ इत्यस्य वाकस्य किरणावल्यां कृतं विश्लेषणणं [२८] महत्त्वपूर्णं वर्तते ।

इतोऽपि यवशब्दस्य अर्थः दीर्घशूकः इति अवबोधनार्थं किरणावाल्यां मीमांसाकानां मतम् उल्लिख्यते “ निर्णीतं चेदं मीमांसकैः ‘सन्दिग्धेषु वाक्यशेषादिति(१/४/१९)’[२९] इति ।

दिनकरीतः अवगम्यते यत्, ‘यवमयश्चरुर्भवति’ इत्यत्र यवपदस्य अन्वयो देहलीदीप-न्यायेन[३०] भवति ।

‘वाक्यशेषादपि शक्तिग्रहः’ मुक्तावल्याः अस्य विषयस्य सरलार्थः दिनकरीटीकायां प्राप्यते, यथा, “द्विविधव्यवहारेण कङ्गौ दीर्घशूके वा यवपदस्य शक्तिरिति सन्देहे सति यवपदस्य इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते इत्यन्वयः”[३१] इति ।

## मुक्तावली

*एवं विवरणादपि शक्तिग्रहः । विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम्, यथा घटोऽस्ती- त्यस्य कलशोऽस्तीत्यनेन विवरणात् घटपदस्य कलशे शक्तिग्रहः । एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणात् आख्यातस्य यत्नार्थकत्वं कल्प्यते ।*

---

२८. “यदा वसन्ते, अन्याः=दीर्घशूकविशेषभिन्नाः ओषधयः=सत्त्यादयः, म्लायन्ते=म्लायवत्यो=वृद्धिशून्या विपर्णा शुष्काश्च भवन्ति, अथ= तदा, एते=दीर्घशूकविशेषाः, मोदमानाः=वृद्धिमन्तः सपर्णा हरितार्द्राश्च, तिष्ठन्ति=वर्तन्ते, ते यवा इति शेषः ।” किरणावली, पृ. ३०७

२९. “निर्णीतं चेदं मीमांसकैः ‘सन्दिग्धेषु वाक्यशेषात्(१/४/१९) जैमिनीयसूत्रेण ।
“--------- इत्यादिना यवशब्दस्य दीघशूके शक्तिनिर्णीतेरि ।” तदेव, पृ. ३०८

३०.“देहलीस्थ दीपो भवनान्तर्बहिस्थविश्ववस्तुप्रकाशकत्वेन सम्बध्नाति तथोक्तषष्ट्यन्तपदमपि पूर्वतनशक्तिग्रहे उत्तरत्र प्रयोगे चान्वेतीत्यर्थः ।” दिनकरी(रामरुद्री), पृ. ३७१

३१. तदेव, पृ. ३७९

## ■ टीकाद्वयस्य तुलना

१. 'विवरणादपि शक्तिग्रहः' इत्यस्मिन् विषये किरणावल्यां बहु व्याख्यायते । अहं मन्ये तादृशव्याख्या निष्प्रयोजनीया। यतोऽहि अयं विषयः मुक्तावल्यामेव सरलरूपेण उपस्थापितो वर्तते।

अपरस्यां दिनकरीटीकायां तादृशव्याख्या कापि नास्ति। तत्र केवलम् आख्यातस्य यत्नार्थे शक्तिग्रहः भवति वा न वा इत्याशंकायाः उत्तरं दत्तं वर्तते[३२]।

### मुक्तावली

*एवं प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः। यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिक- शब्दस्य कोकिले शक्तिग्रहः इति।*

## ■ टीकाद्वयस्य तुलना

१. 'प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः' इत्यस्मिन् विषये दिनकरीटीकायां किमपि नास्ति। तत्र केवलं 'प्रसिद्धपदस्य' इत्यस्य 'प्रसिद्धार्थकपदस्य' इति विवरणं कृतं वर्तते।

अपरस्यां किरणावलीटीकायां 'सहकारतौ मधुरं पिको रौति' इत्यस्मिन् वाक्ये वाक्यस्थितानि पदानि अन्यार्थं निवार्य कथं केवलं पिकपदेन कोकिलम् अवबोधयन्ति तद् व्याख्यायते[३३]। अतः विषयस्यास्य अवबोधने किरणावल्याः महत्वं वर्तते।

*****

३२. "नच विवरणस्य कथं--------- शक्तिग्रहकत्वात्।" दिनकरी, पृ. ३७२

३३. "तत्र मधुरमिति पदेन काकादौ शक्तिग्रहभ्रमवारणम्, सहकारतरौ इत्यनेन मधुरगायकविशेषे शक्तिग्रहभ्रमवारणम्। प्रसिद्धार्थकपदसमभिव्याहारः अनुमानविधया शक्तिग्राहकः, उक्तवाक्यात् 'एतदाम्रवृक्षे मधुररावकर्ता पिकपदवाच्य'इति शक्तिग्रहो भवतीति।" किरणावली, पृ. ३१०

# *शक्तेराश्रयः*

## मुक्तावली

*तत्र जातावेव शक्तिग्रहः, न तु व्यक्तौ, व्यभिचाराद् आनन्त्यच्च । व्यक्तिं विना जातिभानस्या- सम्भावाद् व्यक्तेरपि भानमिति केचित् । तन्न । शक्तिं विना व्यक्तिभानानुपपत्तेः । न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात् । न च व्यक्तिशक्तावानन्त्यम्, सकलव्य- क्तावेकस्या एव शक्तेः स्वीकारात् । न चाननुगमः, गोत्वादेरेवानुगमकत्वात् । किञ्च गौः शक्येति शक्तिग्रहः यदि, तदा व्यक्तौ शक्तिः । यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारक-पदार्थस्मरणं शाब्दबोधश्च न स्यात्, समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् । किञ्च गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम् । गोत्वत्वन्तु गवेतारसमवेतत्वे सति सकलगोदमवेतत्वम् । तथा च गोव्यक्तीनां शक्यतावच्छेदके- ऽनुप्रवेशात् तवैव गौरवम् । तस्मात् तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्ट-व्यक्तावेव विश्राम्यतीति ।*

## ■ टीकाद्वयस्य तुलना

शक्तेराश्रयः कुत्र इति विषयम् आधारीकृत्य टीकाद्वयस्य तुलनात्मकालोचनाय ये विषयाः मया अवधेयाः ते निम्नरूपाः

१. मीमांसकाः कथं, केन विचारेण 'जातावेव शक्त''रिति स्वीकुर्वन्ति तत् किरणावलीतः दिनकरीतः च ज्ञातुं शक्यते । 'नाऽगृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते' इति , एवञ्च 'विशेष्यं नाऽभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति मतद्वयेन मीमांसकाः 'जातावेव शक्तिरिति स्वीकुर्वन्ति[1] । यद्यपि एतद् मतद्वयं दिनकरी-किरणावलीटीकयोः उभयत्र वर्तते, तथापि

१. जातिविशिष्टे शक्तिस्वीकारे जातावपि शक्तिग्रहस्य आवश्यकत्वम् । 'नाऽगृहीतविशेषणा बुद्धिर्विशिष्टेषु नोपजायते' इति न्यायात्, अगृहीतम् अविषयीकृतं विशेषणं ययेति व्युत्पत्त्या विशेषणाऽविषयणी बुद्धिर्विशिष्टेषु नोपजायते-विशिष्टविशेषण न भवतीति तदर्थः । किन्तु 'विशेष्यं नाऽभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'-इतितन्मात्, अभिधा-शक्तिः, विशेष्यं=धर्मिणं, न गच्छेत्=बोधयितुं न समर्था भवति कुतः ? इत्याकांक्षायां-यतः 'क्षीणशक्तिरिति । यतः विशेषणं प्राप्य पदशक्तिःक्षीणशक्तिः=क्षीणसामर्थ्या, भवतीत्यर्थः । तथा च विशेषणशक्तात् पदादेव विशिष्टविषयक-शाब्दबोधोपपत्तौ विशेष्यांशे व्याक्तौ वीजाऽभावात्, निष्प्रयोजनत्वाच्च न शक्तिग्रहः, किन्तु जातावेव शक्तिग्रहः भावतीति मीमांसकाभिप्रयः" किरणावली, पृ.३१०

वाक्यद्वयस्य विश्लेषणं किरणावल्याम् अधिकं वर्तते । दिनकर्य्यां तु एतद्मतद्वस्य किमपि विवरणं नास्ति ।

२. व्यक्तौ शक्तिः स्वीकृते सति व्यभिचारः आनन्त्यदोषः च भविष्यतः इति विषयं दिनकरीटीकायां संक्षेपेण व्याख्यानं कृतम्[२] । परन्तु व्यभिचारानन्त्यदोषयोः सोदाहरणं व्याख्यानं[३] कृतं किरणावल्याम् ।

३. पदस्य शक्तिज्ञानमेव शाब्दबोधस्य विषयनिर्देशं करोति । यस्मिन् विषये पदस्य शक्तिः स्वीकृता न भवति तस्य विषयस्य कदापि शाब्दबोधः नैव भवितुं शक्यते । जातौ पदस्य शक्तिः स्वीकृते सति जातिरेव शाब्दबोधस्य विषयो भवति, न तु व्यक्तिः । अतः मुक्तावल्याम् उक्तं वर्तते - '*शक्तिं विना व्यक्तिभावानुपपत्तेः*' इति । ग्रन्थांशस्यास्य विश्लेषणं क्रियते दिनकरीटीकायां 'पदजन्यपदार्थोपस्थितेः शाब्दबोधं प्रति हेतुतया व्यक्तिशक्तिं विना तद्भानानिर्वाहादिति भावः"[४] इति ।

अपरस्यां किरणावल्यां दिनकर्याः इदमेव वाक्यं भिन्नरूपेण उदाहरणेन सह उपस्थापितम् । यथा, व्यक्तौ शक्त्यस्वीकारे व्यक्तेः शाब्दबोधविषयत्वाऽनुपपत्तिरित्यर्थः । यथा, घटमानये-त्यादिवाक्यज्ञानाधीनशाब्दबोधे पटादेरपि विषयत्वापत्तिः भवति ।[५]

४. '*न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात्* ' इत्यस्य ग्रन्थांशस्य विवरणं सरलतया वर्तते किरणावल्याम् । यथा, 'घटादिपदस्य घटादिव्यक्तौ स्वारसिकलक्षणा नैव स्वीकर्तुं शक्यते"[६] इति । तथा न सति अन्वयाऽनुपपत्तिज्ञानं विनापि व्यक्तेः शाब्दबोधो भवति । परन्तु अन्वयाऽनुपपत्तिं विना यदि मीमांसकाः घटादिव्यक्तेः लक्षणया शाब्दबोधं स्वीकुर्वन्ति तर्हि तेषामेव मतविरुद्धं भवति । यतोहि मीमांसकाः अन्वयाऽनुपपत्तिमेव

---

२. "यस्यां कस्यांश्चिद् व्याक्तौ शक्तिः सर्वास्य् वेति विकल्प्या आद्ये दोषमाह व्याभिचारादिति । अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन तत्र शक्तिज्ञानाभाद् व्याभिचारः । द्वितीये तमाह – आनन्त्यादिति । व्याक्तिभेदेन शक्तिभेदाच्छक्त्यानन्त्यमित्यर्थः ।" दिनकरी, पृ. ३७३

३. "यत्किञ्चिद्व्याक्तौ शक्तिस्वीकारपक्षे तद्विषयकशाब्दबोधं प्रति तद्धर्मिकशक्तिज्ञानमेव हेतुर्वक्तव्यम् । अन्यथा घटादिपदात् पटादिशाब्दबोधापत्तेः , तथा च एकघटव्यक्तावेव घटपदशक्तिस्वीकारे घटान्तरशाब्दाबोधापत्त्या 'कारणाऽभावेऽपि कार्यसत्तात्मक'व्यतिरेकवेभिचारः इति भावः । सर्वासु व्यक्तिषु शक्तिस्वीकारपक्षे निरुक्तव्यभिचारवारणात् द्वितीयपक्षे दूषणान्तरमाह- आनन्त्याच्चेति । व्यक्तिनामानन्त्येन शक्तीनामानन्त्यमिति भावः ।" किरणावली, पृ. ३१०

४. प्रागुक्तम्

५. प्रागुक्तम्, पृ. ३११

६. तदेव

लक्षणाबीजं वदन्ति । इतोऽपि अस्मिन् प्रसङ्गे मतमेकम् उपस्थाप्य व्यक्तौ लक्षणास्वीकरणं निवार्यते । यथा, 'अन्ये तु घटादिपदानां न व्यक्तौ लक्षणा युगपद्वृत्तिद्वयविरोधात्, सकृदुच्चारितशब्दः सकृदेवार्थे गमयतीति न्यायाच्च ।"[७]

अपरस्यां दिनकरीटीकायां ग्रन्थांशास्यास्य किमपि विश्लेषण न दत्तं, केवलं 'अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात्' इति वाक्यस्य उदाहरणं[८] दत्तम् ।

५. मीमांसाकाः वदन्ति यत्, व्यक्तौ शक्तिः स्वीकृते सति आनन्तदोषो भवति । परन्तु नैयायिकाः वदन्ति यत्, न आनन्त्यदोषो भवति । यतो हि सकलव्यक्तौ एका एव शक्तिः स्वीकृता अभवत् । अतः मुक्तावल्यां वर्तते "*न च व्यक्तिशक्तावानन्त्यम्, सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात्*" इति । अत्र 'एकस्या एव शक्तेः' इति ग्रन्थांशस्य व्याख्या किरणावल्यामेवं वर्तते । यथा, 'सकलासु कालान्तरीण-देशान्तरीणादिघटादिव्यक्तिषु एकस्याः नित्यैकस्याः एव ईश्वरेच्छात्मिकायाः शक्तेः विषयतासम्बन्धेन स्वीकारात्, नानाविधविषयतात्मकसम्बन्धाऽऽनन्त्यं तु न दोषायेति भावः"[९] इति ।

अपरस्यां दिनकरीटीकायां 'एकस्या एव शक्तेः' इत्युक्ते 'ईश्वरेच्छारूपास्तस्या एकत्वादित्यर्थः'[१०] इति व्याख्यायते । अर्थात् दृश्यते एव ग्रन्थांशस्य व्याख्याने किरणावल्याः महत्त्वम् अधिकं वर्तते ।

६. '*न चाननुगमः, गोत्वादेरेवानुगमकत्वात्*' इति ग्रन्थांशस्य व्याख्यानं दिनकरीकिरणावलीटीकयोः उभयत्र कृतं वर्तते । टीकाद्वयम् अनुशील्य सरलार्थः एवं भवति यत् व्यक्तौ यदि एका ईश्वरस्य शक्तिः स्वीकृता चेत् कोऽपि आनन्त्यदोषः न भवति । यतो हि सा शक्तिः नानाव्यक्तेः शक्यतावच्छेदकधर्मरूपेण तिष्ठति । न तु अवच्छेदकधर्मरूपेण । यथा गोव्यक्तीनाम्

---

७. किरणावली, पृ. ३११

८. "गामानयेत्यादौ गोत्वजातेरानयनान्वयानुपपत्त्या गोपदस्य गवि लक्षणास्वीकारेऽपि गौरस्तीत्यादौ गोत्वजातेरस्तित्वाद्यन्वयानुपपत्तेर्लक्षणाबीजस्याभावेन लक्षणायाः स्वीकर्तुमशक्यत्वादिति भावः ।" दिनकरी, पृ. ३७४

९. प्रागुक्तम्, पृ. ३९२

१०. प्रागुक्तम्

अवच्छेदधर्मः गोत्वम् इति।[११]

७. मीमांसामतं खण्डणपूर्वकं नैयायिकाः जात्याकृतिविशिष्टव्यक्तौ एव शक्तिः इति स्वीकुर्वन्ति। किमर्थं 'शक्तेराश्रयः जात्याकृतिविशिष्टव्यक्तौ एव' स्वीकरणीयः ? दिनकरीटीकायां कारणम् उच्यते "अतएव च परस्पर-परित्यागेण परस्परस्य बोधाभावात् त्रिष्वेकैव शक्तिः। एतद्बोधनायैव सूत्रे 'जात्याकृतिव्यक्तयः पदार्थः' इत्येकवचनमिति सम्प्रदायः"[१२] इति।

अत्र दिनकरीटीकायां एकस्य सूत्रस्य उल्लेखः क्रियते। परन्तु सूत्रस्य स्थानं कः शास्त्र इत्यादि किरणावलीतः ज्ञातुं शक्यते। तत्र उदाहरणेन सह गोशब्दस्य शक्ति "जात्याकृतिविष्टव्यक्तौ दर्शयति। तत्र वर्तते " अत्र सास्नादिमत्त्वगोत्वगोवान्नतरममविषयीकृत्य गवादिपदात् शाब्दबोधाऽनुदयात् त्रिष्वेव पृथक् शक्तिरिति 'जात्याकृतिव्यक्तयः पदार्थ' इति (न्या० २/२/६५) सूत्रे एकवचनोपादानेन दर्शितमिति प्राञ्चः"[१३] इति।

८. शक्तेराश्रयः जात्याकृतिविशिष्टव्यक्तौ एव। अस्य विषयस्य उदाहरणरूपेण ये विषयाः दिनकरीटीकायां वर्तन्ते तेभ्यः अतिरिक्तविषयाः किरणावल्यां दृश्यन्ते। यथा दिनकरीटीका-याम् इदम्, अदस्, अस्मद्, युष्मद्, सर्व किम् इत्येतेषां शब्दानां[१४] शक्तिः कस्मिन्नर्थे वर्तते तत् व्याख्यातते। एतैः पदैः साकं स्वनिजादि, धेनु, पुष्पवन्त, हर्यादि एत्येतेषां शब्दानां[१५] शक्तिः कस्मिन्नर्थे वर्तते तद्व्याख्या किरणावल्यां क्रियते।

****

---

११. "गोविशेष्यकशक्तिज्ञानस्य अनुगतकारणत्वानुपपत्तिरित्याशंकां परिहरति- न चाननुगमः इति। न गोविषयकशक्तिज्ञानस्य कारणत्वाऽसिद्धिः, न च अनुगतकारणत्वाऽनुपपत्तिश्चेत्यर्थः। तत्र हेतुमाह – गोत्वादेरेवानुगमकत्वादिति -------। किरणावली, पृ. ३१२
" नचाननुगम इति। गोव्यक्तीनामननुगततया विषयतासम्बन्धेन शक्तिज्ञानकारणतायामवच्छेदकत्वासम्भव इत्यर्थः। गोत्वादेरेवेति। तथा च गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वान्नोक्तदोष इति भावः।" दिनकरी, पृ. ३७४

१२. तदेव

१३. प्रागुक्तम्, पृ. ३१४

१४. "एवमिदं पदादिष्वपि---------- विस्तरः"। प्रागुक्तम्, पृ. ३८०

१५. प्रागुक्तम्

# * पदविभागः *

### मुक्तावली

*शक्तं पदम्, तच्चतुर्विधम्- क्वचिद्यौगिकं, क्वचिद्रूढं, क्वचिद्योगरूढम्, क्वचिद्यौगिकरूढम्, तथाहि – यत्रावयवार्थ एव बुध्यते तद्यौगिकम्, यथा पाचकादिपदम्।*

- **टीकाद्वयस्य तुलना**

१. 'शक्तं पदम्' इति ग्रन्थांशस्य पूर्वाकांक्षायाः वर्णनं, ग्रन्थांशस्य विश्लेषणं किरणावल्यां सुन्दरतया सरलतय च क्रियते। तत्र वर्तते " पदज्ञानं तु करणम्'त्यत्र किं पदं, कतिविधं च इत्याकांक्षायां पदनिरूपणे प्राप्ते, तत्र वैयाकरणप्रभृतयः पदानामिव वाक्यस्यापि शक्तिमङ्गीकुर्वन्तीति तन्मतं निराकुर्वन्नाह-शक्तं पदमिति। पदमेव शक्तं न तु वाक्यमित्यर्थः। अनेन पदस्य 'शक्तत्वमिति'- लक्षणमपि दर्शितम्, शक्तिनिरूपकत्वं पदत्वमिति यावत्"[१] इति। अपरस्यां दिनकरीटीकायां तादृशं व्याख्यानं न क्रियते।

२. यौगिकादिपदानां विश्लेषणं किरणावल्यां कृतं वर्तते। यथा, "क्वचित् किञ्चित्पदं यौगिकं शास्त्रकल्पिताऽवयवार्थनिरूपिता शक्तिर्योगः, तन्निरूपकं पदं यौगिकम्। क्वचिद्रूढं किञ्चितपदं रूढं शास्त्रकल्पिताऽवयवार्थभानाऽभावे समुदायार्थनिरूपित- शक्तिः रूढिः, तन्निरूपितं पदं रूढमित्यर्थः। क्वचिद्योगरूढम् किञ्चित्पदं योगरूढं शास्त्रकल्पिताऽवयवार्थाऽन्वितविशेष्यभूताऽर्थनिरूपिता शक्तिः योगरूढिः तन्निरूपितं पदं योगरूढमित्यर्थः। क्वचिद्यौगिकरूढं शास्त्रकल्पिताऽवयवार्थसमुदायार्थयोः स्वतन्त्र-शक्तिः यौगिकरूढिः, तन्निरूपितं पदं यौगिकरूढमित्यर्थः।

तादृशं यौगिकादिपदानां लक्षणं दिनकरीटीकायां न वर्तते। केवलं तत्र क्वचित्पदस्य अर्थः

---

१. किरणावली, पृ.३१५

किञ्चित्पदमिति[२] उच्यते।

३. पाचकादिपदानां यौगिकत्वं कथं सिध्यते तत्तु मुक्तावल्यां नास्ति। किरणावल्यां सुन्दरतया एतस्य व्याख्या वर्तते। तत्र वर्तते " पाचक इत्यत्र 'पच्' इत्येकः प्रकृतिरूपोऽवयवः, 'ण्वुल्'इत्यपरः प्रत्ययरूपोऽवयवः, उभयावयवार्थः-पाककर्ता इति बुध्यते। आदिना याजकादिपदानि बोध्यानीति"[३] इति।

अपरस्यां दिनकरीटीकायां तादृशं किमपि व्याख्यानं नास्ति।

४. किरणावल्यां यौगिकपदानां त्रिधा विभागः क्रियते। यथा, समासः, तद्धितात्वं, कृदन्तं चेति। तत्र ब्राह्मण्यादिस्त्रीप्रत्यान्तपदानि अपि यौगिकमेव इति बोध्यम्। दिनकरीटीकायां तादृशः यौगिकपदविभागः नास्ति।

**मुक्तावली**

*यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या बुध्यते तद्रूढम्, यथा गोमण्डलादिपदम्।*

## ▪ टीकाद्वयस्य तुलना

१. दिनकरीटीकायाम् उल्लिखितं वर्तते यत्, रूढपदस्य उदाहरणं गोमण्डलादिपदं बहुपुस्तकेषु 'गोमण्डपादिपदम्' इति वर्तते, तत् प्रामादिकम्[४]। इत्युक्ते 'गोमण्डलपदम् एकमेव।

अपरस्यां किरणावलीटीकायां रूढपदस्य उदाहरणरूपेण 'गोपदस्य, मण्डलपदस्य, मण्डपपदस्य च पृथक् पृथक् व्याख्यानं कृतम्। यथा, "गोपदेन प्रकृतिप्रत्ययसमुदायरूपेण रूढ्या अवयवसंस्थानविशिष्टगोत्वावच्छिन्नगोरूपोऽर्थो बुध्यते। मण्डलपदेनापि रूढ्या सूर्यादिरोधकः

---

२. "क्वचिदिति। किञ्चिदित्यर्थः" दिनकरी, पृ. ३८२

३. किरणावली, ३१४

४. "मण्डलादीत्यत्र बहुपुस्तकेषु पण्डपादीति पाठः। स प्रामादिकः।" प्रागुक्तम्

कुण्डलाकारपरिधिर्बुध्यते। मण्डपेति पाठे तु 'मण्डप'पदेन रूढ्या वितानस्य बोधो जायते।"[५] इति

२. इतोऽपि किरणावल्यां रूढपदानां त्रिधा विभक्तं क्रियते। यथा, "नैमित्तिकं, पारिभाषिकं, औपाविकं चेति। अथवा जाति-गुण-स्पन्दैर्धर्मैः संकेतवत्तया चतुर्धा रूढं कथ्यते – गोगवयादीनां गोत्वादिजात्या, पश्चाढ्यादीनां लांगुलधनादिद्रव्येण, धन्यपिशुनादीनां पुण्यद्वेषादिगुणेन, चलचपलादीनां कर्मणा अवच्छिन्नशक्तिमत्त्वात् चातुर्विध्यं रूढानामिति बोध्यम्।"[६] तादृशं विभागं दिनकरीटीकायां न क्रियते।

## मुक्तावली

*यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्, यर्था पङ्कजादिपदम्। तथाहि- पङ्कजपदम् अवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलयाऽवयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्, रूढिज्ञानस्य केवलयौगिकार्थबुद्धौ प्रतिबन्धकत्वादिति प्राञ्चः। वस्तुतस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति सान्निध्यात्। यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः। यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मत्वस्य च बाधस्तत्रावयवशक्तिमात्रेण निर्वाह इत्या- प्याहुः। यत्र तु स्थल-पद्मादाववयववार्थबाधस्तत्र समुदायशक्या पद्मत्वेन रूपेण बोधः। यदि तु स्थलपद्मं विजातीयमेव तदा लक्षणयैवेति॥*

*यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्रेण बोधस्तद्यौगिकरूढम्, यथोद्भिदादिपदम्। तत्रहि उद्भेदनकर्ता तरुगुल्मादिर्बुध्यते यागविशेषोऽ-पीति।*

## ▪ टीकाद्वयस्य तुलना

१. पङ्कजपदस्य योगरूढत्वं यद्यपि मुक्तावल्यां वर्तते तथापि किरणावल्याः विश्लेषणमपि महत्त्वपूर्णम् अस्ति। तत्र वर्तते "पङ्कजपदम् 'पंकात् जायते' इत्याकारकाऽवयवशक्त्या, पङ्कजनिकर्तृत्वरूपम्=पंकप्रयोज्यजन्मानुकूलकृतिमत्त्वमिति अर्थं बोधयति, अथ च 'पंकजमि'ति-समुदायशक्त्या=रूढ्या तु –अवयवसंस्थानविशिष्ट-पद्मत्वावच्छिन्नपद्मं

५. किरणावली, पृ. ३१५

६. तदेव

बोधयतीत्यर्थः"[७] इति।

अपरस्यां दिनकरीटीकायां तादृशं पङ्कजपदस्य योगरूढत्वं किमपि न व्याख्यायते ।

२. यौगिकरूढपदस्य स्वतन्त्र लक्षणं कृतं किरणावल्याम् । तत्र वर्तते- " लक्षणं तु 'रूढिनिरूपकतावच्छेदकरूढ्यर्थतावच्छेदकाऽसमानाधिकरणधर्मावच्छिन्नशक्तपदघटितसमुदायत्ववत्व'मिति । पङ्काजिपदे अतिव्याप्तिवारणाय-रूढ्यर्थतावच्छेदकाऽसमानाधिकरण-धर्मावच्छिन्नशक्तत्वं पदविशेषणम्, यौगिकपाचकादिपदेऽतिव्याप्तिवारणाय-रूढिनिरूपक-तावच्छेदकत्वं समुदायत्वविशेषणम्, रूढगवादिपदेऽतिव्याप्तिनिरासाय-तादृशपदघटितत्वं समुदायत्वविशेषणम्" [८]इति।

एवं च उद्भिदादिपदस्य यौगिकरूढत्वं सुन्दरतया किरणावल्यां वर्तते। तत्र वर्तते "उद्भित्पदे उत्-ऊर्ध्वे भिनत्तीति व्युत्पत्तेः अवयवशक्तिज्ञानमात्रेण ऊर्ध्वभेदनकर्तृत्वप्रकारकस्मरणे सति उद्भेदनकर्ता=उद्भेदनकर्तृत्वविशिष्टतरुः, उद्भेदनकर्तृत्वविशिष्टगुल्मः, आदिना उद्भेदनकर्तृत्व-विशिष्टलता इत्यादिर्बुध्यते, अथ च समुदायशक्तिज्ञानमात्रेण 'उद्भिदा यजेत पशुकाम'इति श्रुतौ उद्भिन्नामकयागास्मरणे सति उद्भिन्नामकयागो बुध्यते इत्यर्थः"[९] इति।

अपरस्यां दिनकरीटीकायां यौगिकरूढपदविषये किमपि वक्तव्यं नास्ति । यद्यपि तदावश्यकमासीत्।

*****

७. किरणावली, पृ.३१६

८. तदेव, पृ.३१८

९. तदेव, पृ. ३१९

# *लक्षणा-परीक्षा*

## मुक्तावली

*लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तिः।*

*लक्षणा शक्यसम्बन्ध इति । गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयपपत्ति-स्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते, तत्र लक्षणया तीरस्य बोधः । सा च शक्यसम्बन्धरूपा । तथा हि – प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणम् । ततः शाब्दबोधः ।*

- **टीकाद्वयस्य तुलना**

मुक्तवल्यां लक्षणायाः लक्षणं कृतं यत् '*शक्यसम्बन्धा*' इति । लक्षणस्यास्य विश्लेषणं कृतं वर्तते किरणावल्याम् । तत्र उक्तं वर्तते 'शक्यसम्बन्धत्वं लक्षणायाः लक्षणम्', 'शक्यस्य शक्त्योपस्थापितस्यार्थस्य सम्बन्धः यः कश्चित् सामीप्य-सादृशादिः यथायोग्यं सम्बन्धः स एव लक्षणा इत्यार्थः'[१] । तत्र पुनः उच्यते 'शक्यपरम्परासम्बन्धो लक्षणा' । इत्युक्ते शक्यार्थेन सह लक्ष्यार्थस्य परम्परासम्बन्धोऽपि लक्षणा । मुक्तावल्यां परम्परासम्बन्धरूपा लक्षणा लक्षितलक्षणा नाम्ना उच्यते ।
अपरस्यां दिनकरीटीकायां किन्तु लक्षणायाः लक्षणविषये किमपि वक्तव्यं नास्ति ।

१.भाषापरिच्छेदकारेण विश्वानाथेन मुक्तावल्याम् प्रथममेव उक्तं यत्, लक्षणायाः कारणम् 'अन्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा' इति ।

किरणावलीतः स्पष्टरूपेण अवगम्यते यत्, प्राचीननैयायिकैः लक्षणायाः बीजम् 'अन्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा' स्वीक्रियते । नव्यनैयायिकाः तात्पर्यानुपपत्तिः स्वी-कुर्वन्ति । तस्मात् किरणावल्यां व्याख्यायते ''प्राञ्चः अन्वयानुपपत्तिः तात्पर्याऽनुपपत्तिश्च लक्षणाबीजे, यत्र परस्परपदार्थयोः अन्वयो नोत्पद्यते तत्रैकतरपदस्य लक्षणा उद्भाव्यते, एवं

१. किरणावली, पृ ३१९

यतार्थे वक्तुस्तात्पर्यं न भवति तत्र लक्षणा उद्भाव्यते – इति वदन्ति । नव्यास्तु तात्पर्यानुपपत्तिमेव सर्वत्रानुगतं बीजं वदन्तीति"[२] इति ।

अपरस्यां दिनकरीटीकायाम् ईदृशं स्पष्टरूपेण प्राचीननैयायिक-नव्यनैयायिकयोः मतस्य स्पष्टता न व्याख्यायते ।

२. दिनकरीटीकायां लक्षणाप्रसङ्गे प्रथममेवोक्तं यत् 'लक्षणा द्विधा, जहत्स्वार्थाऽहत्स्वार्था च । तेषाम् उदाहरणमपि शीघ्रमेव दत्तम् । यथा, जहत्स्वार्थायाः लक्षणं – गङ्गायां घोषः, अजहत्स्वार्थायाः लक्षणं – काकेभ्यः दधि रक्ष्यताम् इति । अत्र काकपदस्य लक्षणया दध्युपघातक-काकविडालादीनामपि[३] ग्रहणं भवेत् इति दिनकरीतः ज्ञातुं शक्यते।
अपरस्यां किरणावलीटीकायां प्रथमेव उल्लिखितं यत् 'मुक्तावलीकारेण लक्षणा द्विविधा स्वीकृता' इति । अनन्तरं लक्षणायाः विभागो व्युत्पादनेन सह आलोचितः । यथा, 'जहतीति जहति, जहति स्वानि(पदानि) यं सः जहत्स्वः, जहत्स्वः अर्थो यस्यां सा इति व्युत्पत्त्या शक्यार्थसम्बन्धमात्रबोधजनिकेति । एवं न जहतीति अजहति, अजहति स्वानि यं सः, तादृशोऽर्थ यस्यां से'ति व्युत्पत्ता शक्यार्थलक्ष्यार्थोभयविषयकबोधजनि- केति ।"[४] तत्र अन्यैः स्वीकृता 'जहदजल्लक्षणा'[५] इत्यपि उल्लिख्यते ।

३. लक्षणायाः व्याख्यानप्रसङ्गे मुक्तावल्याम् प्रधानोदारणरूपेण 'गङ्गायां घोषः' इति वाक्यं व्याख्यायते । परन्तु वाक्यस्यास्य व्याख्या किरणावल्यां स्पष्टरूपेण प्राप्यते । तत्र व्याख्यायते "'गङ्गायां घोषः' इत्यत्र गङ्गापदशक्यार्थप्रवाहसामीप्यात्मकसम्बन्धस्य लक्षणात्मकस्य, तीरे =तीरत्वावच्छिन्ने, गृहीतत्वात्=ज्ञातत्वात्, तीरस्य स्मरणम्=तीरत्वावच्छिन्नविषयकस्मृतिः जायते, ततः=स्मरणाऽनन्तरम्, शाब्दबोधः=तीरत्वावच्छिन्नविषयकबोधो जायते इत्यर्थः"[६] इति ।

---

२ . किरणावली, पृ ३१९

३. "लक्षणाद्विविधा, जहत्स्वार्थाऽजहत्स्वार्था च । तत्राद्यां प्रदर्शयति-'गङ्गायामिति । द्वितीयां प्रदर्शयति 'एवं काकेभ्यः इति । दध्युपघातके काकाविडालादिसाधारण दध्युपघातकत्वविशिष्टे ।" दिनकरी, पृ. ३८६

४. प्रागुक्तम्

५. "एवम् अन्ये नैयायिकाः वेदान्तिनश्च तृतीयां जहदजहत्स्वार्थालक्षणां स्वीकुर्वन्ति, जहति च अजहति च जहदजहति, जहदजहति स्वानि यं सः,तादृशोऽर्थः यस्यां सेति व्युत्पत्त्या शक्यतावच्छेदकपरित्यागेन व्याक्तिमात्रबोधजनिकेति, एतदुदाहरणं तु 'सोऽयं देवदत्ते'ति ।" तदेव

६. तदेव, पृ.३२०

अपरस्यां दिनकरीटीकायां तादृशं व्याख्यानं नास्ति। अतः 'गङ्गायां घोषः' इति वाक्ये कथं लक्षणया 'गङ्गापदात्' 'तीरस्य' बोधो भवति तत् दिनकरीटीकातः न अवगम्यते।

### मुक्तावली

*परन्तु यद्यन्वयानुपपत्तिर्बीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्, यष्टिषु प्रचेशान्वयस्यानुपपत्तेरभावात्। तेन यष्टीप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा। एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा, सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात्। एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा। इयमेवाजहत्स्वार्थालक्षणेत्युच्यते। एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात्। यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा क्वचिद्गङ्गापदस्य तीरे, क्वचिद्घोषपदस्य मत्सादौ, लक्षणेति नियमो न स्यात्।*

## ▪ टीकाद्वयस्य तुलना

१. भाषापदिच्छेदग्रन्थे उक्तं वर्तते यत्, अन्वयानुपत्तिः न लक्षणाबीजम्। तथा सति 'यष्टीः प्रवेषये'त्यत्र भोजनस्य तात्पर्यम् न प्रकाश्यते। अतः तात्पर्यवृत्तिः लक्षनाबीजं स्यात्।

यद्यपि मुक्तावलीतः एव अवगम्यते 'यष्टीः प्रवेशय' इत्यत्र तात्पर्यवृत्तिः लक्षणाबीजं स्वीकरणीयं परन्तु 'यष्टीः प्रवेषय' इत्यत्र वक्तुः सम्पूर्णतात्पर्यवाक्यं किं भवेत् इत्यस्य व्याख्यानं किरणावलीतः सुन्दरतया ज्ञायते[७]।

अपरस्यां दिनकरीटीकायां 'यष्टीः प्रवेषय' इति वाक्यस्य विश्लेषणं किमपि न क्रियते।

२. "*काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा, सर्वतो दधिरक्षायास्तात्पर्य-विषयत्वात्*" इति ग्रन्थांशस्य व्याख्यानकाले दिनकरीटीकायाम् उक्तं यत्, 'काकेभ्यः' इति पदात् 'दध्युपघातके काकविडालादिसाधारणदध्युपघातकत्वविशिष्टे'[८] इत्यस्य बोधः भवेत् तत्तु पूर्वमेव उल्लिख्यते।

---

७. "अत्र 'यष्टयो गृहं प्रविशन्ति ताः प्रेरय' इत्यर्थबोधतात्पर्येण 'यष्टीर्गृहं प्रवेषये'ति गृहमध्याहृत्य प्रयोगः, तत्र संयोगजनकव्यापारकर्तृत्व-निर्वाहकव्यापारः ण्यन्तधात्वर्थः, तद्घोटकसंयोगे द्वितीयान्तगृहप्रदार्थगृहवृत्तित्वस्यान्वयः------- ।" किरणावली, पृ. ३२०

८. "लक्षणाद्विविधा जहत्स्वार्थाऽजहत्स्वार्था च ----- द्वितीयां प्रदर्शयति – एवं काकेभ्य इति। दध्युपघातके काकविडालादिसाधारण-दध्युपघातकत्वविशिष्टे।" दिनकरी, पृ. ३८६

किरणावलीतः परन्तु 'काकेभ्यो दधि रक्ष्यताम्' इति वाक्यस्य स्पष्टं सम्पूर्णं विश्लेषणं प्राप्यते। तत्र व्याख्यायते "'काकेभ्यो दधि रक्ष्यताम्' इतिवाक्यघटककाकपदस्य, दध्युपघातके=दधिनाशकत्वावच्छिन्ने अजहत्स्वार्थलक्षणा काकवदनिष्टकारकत्वसबन्धात्मिका भवति, तत्र सर्वतः=दध्युपघातकेभ्यः सर्वेभ्यः, दधिरक्षायाः=दधिनिष्ठायाः नाशाऽप्रतियोगितायाः, तात्पर्यविषयत्वात्=वक्तुरिच्छाविषयत्वात्, तादृशतात्पर्यस्य काकपद-शक्यार्थे काकेऽनुपपत्त्या तात्पर्याऽनुपपत्त्यात्मकबीजाल्लक्षणा उद्भाव्यते इत्यर्थः"[९] इति।

३. *"छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा"* इति मुक्तावल्याः ग्रन्थांशस्य 'एकसार्थवाहित्वम्' इति पदस्य व्याख्या महत्त्वपूर्णा। किरणावल्यां स्पष्टमेव उल्लिख्यते यत्, एतदुदाहरणम् अजहत्स्वार्थलक्षणायाः द्वितीयोदाहरणम्। पुनश्च 'एकसार्थवाहित्वम्' इति पदस्य किरणावल्याः व्याख्यानं महत्त्वपूर्णम्। तत्र वर्तते "अजत्स्वार्थाया उदाहरणान्तरमाह – एवं छत्रिणो यान्ती,त्यादाविति। छत्र्यछत्रिषु गच्छन्तु छत्रिणां बाहुल्येन छत्रिणो यान्तीत्यच्छत्रिषु यानकर्तृत्वाऽनुपपत्त्या 'छत्रि'पदस्य छत्र्यछत्र्युभयसाधारणे एकसार्थवाहित्वे=एकसार्थवाहित्व-विशिष्टे अजहत्स्वार्थलक्षणा=छत्रिघटितत्वसम्बन्धात्मिका उद्भाव्यते, तथा च 'यानानुकूल-कृतिमन्त एकसार्थवाहा'इत्यन्वयबोधः। इयमेव= शक्याऽशक्योभयधर्मावच्छिन्न-लक्षणैव, अजहत्स्वार्थलक्षणा=अजहति स्वानि पदानि यं सः, तादृशोऽर्थो यस्यां से'ति व्युत्पत्त्या-शक्यार्थलक्ष्यार्थोभयविषयकबोधजनिका उच्यते इत्यर्थः"[१०] इति।

अपरस्यां दिनकरीटीकायाम् ईदृशं व्याख्यानम् 'एकसार्थवाहित्वम्' इति पदस्य नास्ति। तत्र केवलं वर्तते "एकसार्थवाहित्वे एकसर्थवाहित्वविशिष्टे' इति। पुनः 'छत्री' इति पदस्य व्याख्यानकाले दिनकरीटिकायाम् उच्यते 'न्यायमते तु छत्रिपदस्येवैकसार्थवहित्वे लक्षणा प्रत्ययार्थश्च संबन्धी। तथा चैकसार्थवन्तो गच्छन्तीत्यन्वयः"[११] इति। यद्यपि इदं व्याख्यानं

९. किरणावली, पृ. ३२०

१०. तदेव, पृ. ३२१

११. दिनकरी, पृ ३८७

किरणवल्यामपि समानमेव दृश्यते[१२]।

४. *"यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा क्वचिद्गङ्गापदस्य तीरे, क्वचिद्घोषपदस्य मत्सादौ, लक्षणेति नियमो न स्यात् "* इति ग्रन्थांशस्य व्याख्यानकाले दिनकरीटीकायां दृश्यते यत्, "क्वचिद् गङ्गापदस्य तीरे तात्पर्यग्रहस्थले । क्वचिद् घोषपदस्य मत्स्यादौ तात्पर्यग्रहस्थले" [१३] इति । अहं मन्ये ग्रन्थांशस्यास्य व्याख्याने दिनकरीटीकायाः एतद्व्याख्यान-मेव पर्याप्तम्। यतो हि, मुक्तावल्याः अयं ग्रन्थांशः सरलः एव।

किरणावल्यां ग्रन्थांशस्य व्याख्या ईदृशा वृहती कठिना च वर्तेते येन बालानां कृते कष्टं भवति इति अहं मन्ये।

**मुक्तावली**

*इदन्तु बोध्यम्। शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा, तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः। परन्तु एवं क्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्, तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम्। यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते। यदा द्विरेफादिपदात् रेफद्वसम्बन्धो भ्रमरपदे ज्ञायते भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते इति तत्र लक्षितलक्षणा।*

## ▪ टीकाद्वयस्य तुलना

१. *"शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः"* इति ग्रन्थांशस्य व्याख्या किरणावल्यं सरलरूपेण प्राप्यते। यया ग्रन्थांशस्य अवबोधनं सम्यक्तया भवति इति अहं मन्ये । "शक्यसम्बन्धा=लक्षणा यदि=यदा तीरत्वेन रूपेण गृहीतः= तीरत्वा-वच्छिन्न(तीर)विशेष्यकज्ञानीयप्रकारतावान्, लक्षाणाज्ञानं यदा तीरत्वावच्छिन्न-

---

१२. "नव्यास्तु – छत्रपदस्य एकसार्थवाहित्वे लक्षणा, मतुबः सम्बन्धी अर्थः, तथा च एकसार्थवन्तो यान्तीत्यर्थः, एकसार्थवाहित्वण् च - छत्र्यादि-घटितसमुहत्वम् इत्याहुः।" किरणावली, पृ.३२०

१३. दिनकरी पृ. ३८८

विशेष्यकमिति यावत् । तदा=तदुत्तरक्षणे, तीरत्वेन रूपेण=तीरबोधः तीरत्वावच्छिन्नतीर-विशेष्यकस्मरणे सति तीरत्वावच्छिन्नतीरविशेष्यकः शाब्दबोधो भवतीति"[१४] इति ।

अपरस्यां दिनकरीटीकायां तदृशं ग्रन्थांशस्य किमपि विश्लेषणं नास्ति ।

२. *"यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्"* इत्यस्य ग्रन्थांशस्य अपि विश्लेषणं महत्त्वपूर्णं वर्तते । यथा, "यदि तु= यदा तु , लक्षणाज्ञानं गङ्गातीरत्वावच्छिन्नविशेष्यकम्, तदा=तदृशलक्षणाज्ञानोत्तरक्षणे, तेनैव रूपेण स्मरणम्=गङ्गातीरत्वप्रकारक-स्मरणे सति, गङ्गातीरत्वावच्छिन्नविशेष्यकः शाब्दबोधो जायते इत्यर्थः" इति ।

अपरस्यां दिनकरीटीकायाम् अस्य ग्रन्थांशस्यापि किमपि विश्लेषणं किरणावल्याम् नास्ति ।

३. उपरि उक्तग्रन्थांशस्य का लक्षणा भवति तस्मिन् विषये किरणावल्याम् उक्तं वर्तते यत्, "अत्र गंगापदस्य तीरत्वावच्छिन्ने यदा लक्षणा सा जहत्स्वार्था, यदा तु गंगातीरत्वावच्छिन्ने, तदा सा अहत्स्वार्था इति प्राचीना " इति । अत्र नव्यनैयायिकाः उभयपक्षेऽपि जहत्स्वार्थत्वं मन्यते[१५] ।

अपरस्यां दिनकरीटीकायामपि समानं वक्तव्यं दृश्यते । यथा, "तीरत्वेन लक्षणायामेव जहत्स्वार्थत्वस्य सर्वसंमतत्वात् । गङ्गतीरत्वेन भाने त्वजहत्स्वार्थैव लक्षणा इति"[१६] इति । इत्युक्ते किरणावलीतः अस्माभिः प्राचीन-नवीनयोः मतं ज्ञायते । दिनकरीटीकायाम् अस्मिन् विषये यत् वर्तते किं तत् प्राचीनानां नवीनां वा ? इति किमपि न ज्ञायते ।

४. 'लक्षितलक्षणा' इति विषये भाषापरिच्छेदः इत्यस्मिन् ग्रन्थे उक्रं वर्तते यत्, *"यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते"* इति ।
अस्य ग्रन्थांशस्य सोदाहरणं विश्लेषणं किरणावल्यां वर्तते । यथा, "यत्र तु=यादृशे द्विरेफपदे, शक्यार्थस्य=रेफद्वयस्य परम्परासम्बन्धरूपा=स्वघटितपदवाच्यत्वात्मिका, या लक्षणा सा 'लक्षितलक्षणा' इति व्यवह्रियते इत्यर्थः" । स्वं-द्विरेफपदशक्यार्थः रेफद्वयम्, तद्घटितपदं भ्रमर

---

१४. किरणावली, पृ. ३२३

१५. तदेव

१६. दिनकरी, पृ. ३८८

इति, तद्वाच्यत्वं मधुप इति, 'द्विरेफो रौती'त्यत्र द्विरेफस्य शब्द शब्दकर्तृत्वान्वयाऽनुपपत्त्या व लक्षितलक्षणया मधुपो बुध्यते इति" इति।[१७]

दिनकरीटीकायां किन्तु तथा किमपि विश्लेषणं नास्ति। तत्र केवलं वर्तते 'स्ववाच्यरेफद्वय-घटितपदवाच्यत्वादिरूपा'[१८] इति। अत्र दृश्यते यत् किरणावल्याः विश्लेषणं धारावाहिकं सुशृङ्खलं सम्पूर्णञ्च।

## ***मुक्तावली***

*किन्तु लाक्षिकपदं पदं नानुभवकम्। लाक्षिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम्, शक्तिलक्षणा-न्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्तार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात्। वाक्ये तु शक्तेरभावाच्छश्य-सम्बन्धरूपा लक्षणापि नास्ति। यत्र तु गभीरायां नद्यां घोष इत्युक्तम्, तत्र नदीपदस्य नदीतीरे लक्षणा। गभीरपदार्थस्य नद्या सहाभेदेन्वायः, क्वचिदेकादेशान्वयस्यापि स्वीकृतत्वात्। यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा नदीपस्य गभीरनदीतीरे लक्षणा, गभीरपदं तात्पर्यग्राहकम्।*

## ▪ टीकाद्वयस्य तुलना

१.मुक्तावल्याम् उक्तं वर्तते यत्, *"लाक्षणिकं पदं नानुभवकम्"* इति। मुक्तावल्याम् अस्य ग्रन्थांशस्य उपस्थानस्य कृते या आकाक्षा अपेक्षते सा किरणवल्यां महत्तपूर्णा वर्तते। तत्र वर्तते "ननु सर्वत्र शाब्दबोधे पदज्ञानस्य असाधारणकारणत्वात्, तत् पदज्ञानं किं शक्तपदज्ञानम् उत लक्षकपदज्ञानं, किं वोभयपदज्ञानम् इत्याकांक्षायां तच्छक्तपदज्ञानमेव तच्छाब्दबोधे करणं न तु लक्षकपदज्ञानमिति प्राचीनमतं दर्शयति- किन्तु लाक्षणिकमिति" इति[१९]।

अपरस्यां दिनकरीटीकायां तादृशा सुस्पष्टा आकांक्षा अत्र न विद्यते। अत्र वर्तते "ननु तच्छाब्दबोधे तच्छक्तपदज्ञानत्वेन हेतुत्वाल्लाक्षणिकशाब्दबोधः कथं स्यादित्यत आह-किंत्विति"[२०] इति।

---

१७. प्रागुक्तम्, पृ. ३२५

१८. दिनकरी, पृ. ३८९

१९. किरणावली, पृ. ३२६

२०. प्रागुक्तम्, पृ. ३९०

अत्र दृश्यते यत्, दिनकरीटीकायाः ग्रन्थांशस्य कृते पूर्वाकांक्षा किरणावलीवत् न सम्पूर्णा स्पष्टा च।

अनन्तरं लक्षणायाः आलोचनान्ते समासबद्धपदानां क्षेत्रे कस्मिन् कस्मिन् पदे लक्षणा भवेत् तत् आलोच्यते । विश्वनाथस्य मतानुसारं समासबद्धपदानां क्षेत्रे कुत्रापि एकादेशान्वयं कुत्रापि तात्पर्य्यग्राहकं स्वीकृत्य क्षेत्रविशेषे विभिन्नपदे लक्षणा स्वीकरणीया । तेषां मतानुसारं साधारणतया द्वन्द्वसमासे कर्मधारयसमासे च लक्षणायाः आवश्यकता नैव भवति । तत्पुरुषसमासे पूर्वपदे लक्षणा स्वीकरणीया। अव्ययीभावसमासे परपदे लक्षणा भवति इत्यादि। बाहुल्याद् एवं च 'बालानां सुखबोधाय' इति विचिन्त्य एतेषां विषयानां टीकाद्वयस्य तुलनात्मकसमीक्षा न क्रियते ।

*****

# *सहकारिकारणानि*

## मुक्तावली

***आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ।८२ ॥।***
***कारणं, सन्निधानं तु पदस्यासत्तिरुच्यते ।***

*आसत्तिरित्यादि । आसत्तिज्ञानं योग्यताज्ञानम् आकाङ्क्षाज्ञानं तात्पर्यज्ञानञ्च शाब्दबोधे कारणम् । तत्रासत्तिपदार्थमाह-सन्निधानन्त्विति । अन्वयप्रतियोग्यनुयोगिबोधकपदयोरव्य- वधानमासत्तिः, तज्ज्ञानं शाब्दबोधे कारणम् । क्वचित् व्यवहितेऽप्यव्यवधानभ्रमाच्छाब्द- बोधादिति केचित् । वस्तुतस्त्वव्यवधानज्ञानस्यानपेक्षितत्वाद् यत्पदार्थस्य यत्पदार्थे- नान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम् । तेन गिरिर्भुक्तमग्निमान् देवदत्तेने- त्यादौ न शाब्दबोधः । नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दबोधः । आसत्ति- भ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः ।*

- **टीकाद्वयस्य तुलना**

१. अस्माभिः दृष्टं यत्, वृत्तिज्ञानसहकृतपदजन्यपदार्थज्ञानं भवति । इदृशं पदार्थज्ञानमेव शाब्दबोधः । इदानीं पदार्थसमूहस्य परस्परान्वयबोधरूपशाब्दबोधस्य सहकारि-कारणानि कानि तानि उल्लिख्यन्ते । आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानम् इत्येतानि सहकारिकारणानि । कारिका वर्तते "*आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ॥*" इति । इदानीं कारिकांशस्य विश्लेषणं किरणावल्यां दिनकर्य्यां च कथं क्रियते तत् तुलनीयम् ।

प्रथमतः, किरणावल्यां प्रथममेव उल्लिख्यते यत्, शब्दसामान्यं प्रति वृत्तिसहकृतपदज्ञानं करणं सत्यपि ईदृशानि अनेकवाक्यानि सन्ति येषाम् अवगमने पदज्ञानातिरिक्तं भिन्नकारणं स्यात् । तत् कारणम् आसत्त्यादि । यथा 'गिरिर्भुक्तमग्निमान् देवदत्तेन' वा 'बह्निना सिञ्चति ' इत्यादौ पदज्ञानेन एव शाब्दबोधो न भवति । एतेषाम् अवबोधने पदज्ञानातिरिक्तासत्त्यादेः ज्ञानम्

आवश्यकम् । इत्युक्ते शाब्दबोधे आसत्त्यादेः आवश्यकता का किमर्थम् आसत्त्यादि-सहकारिकारणानां ज्ञानम् आवश्यकं तत् किरणावल्याम् आलोचितं वर्तते ।[१]

द्वितियतः, मूले ‘आसत्तियोग्याताकाङ्क्षातात्पर्यज्ञानमिष्यते’ इत्यत्र कः समासः, विग्रह-वाक्यानि किदृशानि भवेयुः इत्यादिविषयानां व्याख्या सरलभाषया वर्तते ।[२]

तृतीयतः, शाब्दबोधस्य कारणम् आसत्तिः आसत्तिज्ञानं वा ? इत्यस्य प्रश्नस्य उत्थापनं व्याख्यानं च उदाहरणेन सह सुन्दरतया किरणावल्यां[३] वर्तते ।

चतुर्थतः, आसत्तियोग्यताकाङ्क्षातात्पर्यानां स्वरूपं संक्षेपेण उल्लिख्यते ।[४]

अपरस्यां दिनकरीटीकायां मूलस्थे ‘*आसत्तियोग्याताकाङ्क्षातात्पर्यज्ञानमिष्यते*’ इत्यस्य कारिकांशस्य अवगमने ये विषयाः तुलनीयाः ते आलोच्यन्ते ।

प्रथमतः, ‘आसत्त्या’दिकारिकांशस्य अन्वयपूर्वकं व्याख्यानं किमपि नास्ति । द्वितीयतः, कारिकांशस्य समासः कः भवेत्, किं विग्रहवाक्यं भवेत् इत्यादि विषयाः न आलोचिताः वर्तन्ते ।

तृतीयतः, ‘*आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते*’ इत्यस्य व्याख्या दिनकर्य्यां महत्त्वपूर्णा वर्तते । तत्र उच्यते यत्, मूले यत् ‘आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानम्’ इति वर्तते, तस्मात् शाब्दबोधस्य कारणत्वं केवलं आसत्तेः इति अवगम्यते । परन्तु यदि एवं स्यात् तर्हि ‘गिरिर्भुक्तमग्निमान् देवदत्तेन’ इत्यत्र व्यभिचारः भवेत् । यतो हि ‘गिरि’पदेन सह

---

१. “यथा “शब्दसामान्यं प्रति वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा पदज्ञानस्य कारणत्वमित्यायातम्, तथा च ‘गिरिर्भुक्तमग्निमान् देवदत्तेन’ ‘वह्निना सिञ्चति’ घटः कर्मत्वमानयनं कृतिः’ इत्यादौ वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा पदज्ञामात्मकस्य कारणस्य सत्त्वेऽपि शाब्दबोधानुदयाद् अन्वयव्यभिचारः, इत्येतद्वारणाय- आसत्तियोग्यताकांक्षातात्पयज्ञानानां सहकारिकारणतां दर्शयति – मूले आसत्तिति ” इति । किरणावली, पृ ३३९

२ . “आसत्तिश्च योग्यता च आकांक्षा च तात्पर्य चेति द्वन्द्वः, तेषां ज्ञानमिति षष्ठीतत्पुरुषः, द्वन्द्वान्ते श्रूयमानपदस्य प्रत्येकेऽभिसम्बन्धात् ज्ञानपदस्य प्रत्येकमन्वयेन आसत्तिज्ञानं योग्यताज्ञानम् आकाक्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे सहकारिकारणमिष्यते ” । तदेव

३. “सरूपसत्त्यासत्तेः ‘गिरिर्भुक्तमग्निमान् देवदत्तेने’त्यत्र सत्त्वेऽपि शाब्दबोधाऽभावात् अकारणत्वात् ॥ स्वरूपसत्त्या आसत्तेः कारणताभ्रमवारणायैव मुक्तावल्यामाह – आसत्तिज्ञानमिति ।” तदेव

४ . “**आसत्तिः** – पदसमूहनिष्ठा, सा च ‘अव्यवधानेन पदोच्चारणप्रयुक्तसन्निधिरूपा, -- । **योग्यता** – अर्थनिष्ठा, सा च ‘एकपदार्थेऽपरपदार्थवत्त्वरूपा, ---- । **आकाङ्क्षा** - पदनिष्ठा, सा च ‘पदस्य यत्पदविरहप्रयोज्य शाब्दबोधजनकत्वाभाववत्त्वं तत्पदे तत्पदवत्त्वरूपा,--- । **तात्पर्यम्** – शब्दनिष्ठम्, तत्प्रतीतीच्छयोच्चारितत्वरूपम् ।” तदेव

'अग्निमान्'पदस्य अन्वये व्यवधानं स्थितेऽपि कस्यापि अव्यवधानभ्रमात् शाब्दबोधः भवितुं शक्यते। अतः मूले स्थिता आसत्तिः इत्युक्ते आसत्तिज्ञानं ग्रहणीयम् इति सुन्दरतया व्याख्यायते दिनकरीटीकायाम्।[५]

२. इदानीम् आसत्तेः द्वितीयालोच्यविषयः वर्तते तस्य **लक्षणम्**। कारिकायाम् आसत्तेः लक्षणं कृतं वर्तते "*सन्निधानं तु पदस्य आसत्तिरुच्यते*" इति। लक्षणमिदम् आधारीकृत्य अधुना टीकाद्वयस्य तुलना क्रियते।

किरणावल्याम् कारिकांशस्यास्य अन्वयपूर्वकं व्याख्यायते। कारिकांशस्य सरलान्वयः भवति 'पदस्य सन्निधानं तु आसत्तिः' इति। अत्र 'पदस्य' इत्युक्ते 'पदानाम्' इति ग्रहणीयम्।

द्वितीयतः, कारिकास्थितलक्षणं तु प्राचीननैयायिकाणां, नव्यनैयायिकाः लक्षणमेतं न स्वीकुर्वन्ति इति अस्माभिः स्पष्टरूपेण किरणावलीतः ज्ञातुं शक्यते यत्, "*अन्वयप्रतियोग्य-नुयोगिपदयोरव्यवधानमासत्तिः*" इति प्राचीननैयायिकाणां मतम् इति। एवं च "*यत्पदेन यत्पदस्यान्वयोऽपेक्षितस्तयोरप्यव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्।*" इति नवीननैयायि-कानां मतम् इति।

परन्तु दिनकरीटीकातः एवं स्पष्टरूपेण न ज्ञातुं शक्यते यत्, एतत् प्राचीनानां मतम् एतच्च नवीनानां मतम् इति।

३. "*यत्पदेन यत्पदस्यान्वयोऽपेक्षितस्तयोरप्यव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्।*" इति नवीनानां मतस्य सोदाहरणं व्याख्यायते[६] किरणावल्याम्।

अपरस्यां दिनकरीटीकायामपि एतस्य व्याख्या वर्तते। तत्र उल्लिख्यते " यर्पदार्थेति। अपेक्षितः तात्पर्यविषयः। तयोरिति। तयोः पदार्थयोरित्यर्थः। तादृशपदार्थयोरव्यवधानमासत्तिस्तदु-

---

५. " स्वरूपसत्याश्चासत्तेः कारणत्वं न सम्भवति, गिरिर्भुक्तमित्यादौ गिरिपदाग्निमत्पदयोरव्यवधानभ्रमेण शाब्दबोधोदयेन व्यभिचारात्, अतो मूलस्थम् आसत्तिपदमासत्तिज्ञानम् --- ।" दिनकरी, पृ, ४०९

६. "येन द्वितीयान्तगोपदार्थेन गोकर्मत्वेन सह यस्य तिङन्तानयपदार्थस्य, अन्वयः= निरूपकत्वसंसर्गः, शाब्दबोधविषयतयाऽपेक्षितः= तात्पर्यविषयतयाऽभिमतः, तयोः=द्वितीयान्तगोपद-तिङन्ताऽऽनयपदयोः, - पदनिष्ठंम् अव्यवधानेन=अव्यवधानमेव, -अव्यवहितोत्तरत्वा-ऽव्यहितपूर्वत्वान्यतरमेवेति यावत्, -आसत्तिः, तस्य उपस्थितिः=स्मरणम्, शाब्दबोधे हेतुरित्यर्थः।" किरणावली, पृ. ३४०

पस्थितिः कारणमित्यर्थः”[७] इति । इत्युक्ते “यत्पदेन यत्पदस्यान्वयोऽपेक्षितस्तयोरप्य-व्यवधानेनोपस्थितिः शाब्दबोधे कारणम् ” इत्यस्य अन्वय-काले येषां पदानां विश्लेषणम् आवश्यकं केवलं तेषामेव विश्लेषणं क्रियते, नतु किरणावलीवत् सर्वपदानाम् ।

४. *‘नीलो घटो द्रव्यं पट’* इति वाक्ये अन्वययोग्यपदार्थद्वयस्य अव्यवधानरूपासत्तेः अभावात् शाब्दबोधः न स्यात् । परन्तु शाब्दबोधो भवति । कथम् ? तस्य व्याख्या किरणावल्यां दिनकरीटीकायां च उभयत्र सरलतया क्रियते । परन्तु दिनकर्य्यां केवलं नीलपदेन सह पटपदस्य अन्वयव्याख्यापूर्वकं व्याख्यायते[८] । तत्र ‘नीलो घटः’ इति शाब्दबोधः आसत्तिभ्रमाद् भवति ।
अपरस्यां किरणावल्यां नीलपदेन सह पटपदस्य, घटपदेन सह द्रव्यपदस्य अन्वयव्याख्यापूर्वकं व्याख्यायते[९] । अपिच वक्तुस्तात्पर्यविषयः न भूत्वापि ‘नीलो घटः’ ईदृशशाब्दबोधस्य कारणत्वेन ‘समानलिङ्गकवृत्तितयाऽव्यवधानत्वश्रावण-दोषस्य’ कारणत्वमुक्तं किरणावल्याम् ।

५. प्राचीनैः उक्तं यत् क्वचिद् आसत्तिभ्रमादपि शाब्दबोधः भवति । परन्तु आसत्तिभ्रमात् शाब्दबोधः भ्रमात्मकः प्रमा वा भवति ? अस्य विषयस्य व्याख्या स्पष्टरुपेण किरणावल्यां क्रियते । “ आसत्तिभ्रमात् शाब्दबोधोऽपि भ्रमात्मकः इति प्राचीनमतं निसरितुमाह – आसत्तिभ्रमादिति । आसत्तिभ्रमेणापि जायमानशाब्दबोधस्तु न भ्रमात्मकः, किन्तु प्रमात्मकः एव , आसत्तिभ्रमस्य शाब्दभ्रमेऽप्रयोजकत्वात्, योग्यताभ्रमस्यैव शाब्दभ्रमप्रयोजकत्वात् ।”[१०] अर्थात् शाब्दभ्रमस्य प्रयोजकः न आसत्तिभ्रमः, परन्तु योग्यताभ्रमरेव शाब्दभ्रमस्य प्रयोजकः ।

---

७ . दिनकरी, पृ. ४१०

८. “नीलो घटो द्रव्यं पट इत्यत्र नीलपदार्थपटपदार्थयोः यत्रान्वयो वक्तुस्तात्पर्यविषयो न तु नीलपदार्थघटपदार्थयोस्तत्र नीलपदघटपदयोरासत्तिर्न स्यात् । तत्तदर्थान्वयस्य तात्पर्यविषयत्वाभावात् । अतस्तत्रेष्टापत्तिमाह – नीलो घट इत्यादिना । तर्हि तत्र नीलो घट इति कथं शाब्दबोध इत्यत आह – भ्रमाच्छाब्दबोध इति ।” तदेव, पृ. ४११

९ . “घटो द्रव्यं नीलः पटः’ इति अन्वयबोध-तात्पर्येणोच्चरितवक्ये नीलपटयोः तात्पर्यविषयाऽन्वयबोध-प्रयोजकज्ञानविषयत्वसत्त्वेऽपि तन्निष्ठाऽव्यवधानत्वाऽभावान्न भवति शाब्दबोधः, नीलपदघटपदयोरव्यवधानसत्त्वेऽपि तयोः तात्पर्याऽविषयान्वयबोधप्रयोजकज्ञानविषयत्वाऽभावात् न तन्निष्ठाऽव्यवधानस्याऽऽसत्तित्वं, तथापि समानलिङ्गकवृत्तितयाऽव्यवधानत्वश्रावणदोषस्य कारणस्य ‘नीलो घटः’ इत्यत्र सत्त्वात् आसत्तित्वभ्रमः” किरणावली, पृ. ३४१

१०. तदेव

दिनकरीटीकायामपि अयं विषयो व्याख्यायते “ ननु तत्र यदि आसत्तिभ्रमस्तदा शाब्दबोधो भ्रमात्मकः स्यात् । --- आसत्तिभ्रमस्य न शाब्दबोधप्रयोजकत्वं  किन्तु योग्यताभ्रमस्य । ‘आसत्तिभ्रमाच्छाब्दभ्रमः’ इति प्राचीनगाथा तु निर्युक्तित्वादश्रद्धेयेति भावः ” [११] इति ।

## मुक्तावली

*ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्युक्तम्, तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेन तत्तत्पदस्मरणासम्भव इति चेत् । न, प्रत्येकपदानुभवजन्यसंस्कारैश्चरमं तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तेः । नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेक- स्मरणोत्पत्तेरपि सम्भवात् । तावत्पदसंस्कारसहितचरमवर्णज्ञानस्यो-द्बोधकत्वात् । कथमन्यथा नानावर्णैरेक- पदस्मरणम् । परन्तु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायात् तावत्पदार्थानां क्रियाकर्मभावेनान्वयबोधरूपः शाब्द- बोधे भवतीति केचित् ।*

*“वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति ।*
*तथैव दर्वे युगपत् पदार्थाः परस्परेणान्वितो भवन्ति ॥”*

*अपरेतु – “यद्यदाकाक्षितं योग्यं सन्निधानं प्रपद्यते ।*
*तेन तेनान्वितः स्वार्थः स्वार्थः पदेरेवावगम्यते ॥”*

*तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्यप्याहुः । एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः, तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति ।*

- **टीकाद्वयस्य तुलना**

१. अस्माभिः दृष्टं यद्, वक्तुः तात्पर्यानुसारं पदयोः अव्यवधानमेव आसत्तिः । परन्तु तथापि समस्या वर्तते । यथा, ‘*छत्री कुण्डली वासस्वी देवदत्त*’ इत्यत्र  । अस्याः समास्यायाः विश्लेषणं किरणावल्यां स्पष्टं वर्तते- ‘‘अथ-चतुःपञ्चविशेषणविशिष्टविशेष्ये प्रथमविशेणाऽव्यवधा-नत्वाऽभावात् शाब्दबोधकाले च प्रथमद्वितीयविशेषणपदनिष्टासत्ति-ज्ञानस्य क्षणिकस्य नाशात् कारणाऽभावेन शाब्दबोधाऽनुपपत्तिरित्याशंकते- ननु यत्रेति ।’’[१२]

---

११. दिनकरी, पृ. ४११
१२. किरणावली, पृ. ३४१

अपरस्यां दिनकरीटीकायां अस्याः समस्यायाः विशेषणं वर्तते- "अनेकपदघटित-वाक्यस्थलेऽव्यवधानेन पदोपस्थित्यसंभवादित्याशङ्कते – नन्विति ।"[१३] इत्युक्ते द्वयोः टीकयोः तथ्यस्य आधिक्यं न्यूतता वा वर्तते । किरणावल्यां स्पष्टरूपेण चतुःपञ्चविशेषणयुक्तविशेषस्य उल्लेखं क्रियते । परन्तु दिनकर्य्यां अनेकपदघटित-वाक्यस्थस्य उल्लेखं क्रियते ।

२. "*प्रत्येकपदानुभवजन्यसंस्कारैश्चरमं तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तेः*" इति अस्य ग्रन्थांशस्य प्रत्येकपदस्य अन्वयपूर्वकं विश्लेषणं किरणावल्यां क्रियते –"तत्तच्छत्रि-कुण्डलीतिप्रत्येकपदश्रावणानुभवजन्यप्रत्येकपदविषयकसंस्कारैः चरमपदस्मरणकालपर्यन्त-स्थायिभिः, चरमस्य=चरमदेवदत्तपदश्रावणोत्तरकालीनस्य, तावत्पदविषयक- स्मरणस्य =यावद् विशेषणविशेष्यपदसमुदायविषयकस्य युगपदेकस्मरणस्य, अव्यवधानेन=अभेदेन, उत्पत्तेः= जननादित्यर्थः" इति ।[१४]

अपरस्यां दिनकरीटीकायां केवलं वर्तते - "अव्यवधानेनोत्पत्तेरिति । अभेदेऽप्यव्यवधान-संभवादिति भावः इति ।"[१५] इत्युक्ते टीकाद्वये तथ्यस्य आधिक्यं न्युनता वा वर्तते । किरणावल्यां प्रत्येकपदस्य विश्लेषणं क्रियते, दिनकर्य्यां तु केवलम् 'अव्यवधानेनोत्पत्तेः' इत्येतयोः विश्लेषणं क्रियते ।

३. "*नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात्*" इत्यस्य ग्रन्थांशस्य का प्रासङ्गिकता इत्यस्य किरणावल्यां दिनकर्य्यां च भिन्नो भिन्नः प्रसङ्गः दृश्यते । तत्र किरणावल्यां दृश्यते यत्, एतत् "प्रत्येकपदानुभवजन्यसंस्कारैश्चरमं तावत्पदविषयकस्मरणस्या-व्यवधानेनोत्पत्तेः" इति ग्रन्थांशस्य उदाहरणम् ।[१६]

परन्तु दिनकरीटीकायाम् अस्य प्रासङ्गिकताप्रसङ्गे उक्तं वर्तते – "ननु तद्विशेष्यक-तत्प्रकारक-स्मृतिं प्रति तद्विशेष्यक-तत्प्रकारक संस्कारत्वेन जनकत्वात् कथं प्रत्येक-

१३. दिनकरी, पृ. ४१२
१४. किरणावली, पृ. ३४२
१५. प्रागुक्तम्, पृ. ४१३
१६. "---------- एतद् दृष्टान्तेन उपपादयति नानासन्निकर्षैरिति ।" प्रागुक्तम्

पदसंस्कारैर्नानापदविशेष्यकस्मरणम् ? भिन्नविषयकत्वादत आह – नानासन्निकर्षैरिति”[१७] इति।

४. “*तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् । कथमन्यथा नानावर्णैरेकपदस्मरणम् ।*” इत्यत्र ‘अन्यथा’ इति पदस्य विश्लेषणं टीकाद्वये भिन्नं दृश्यते। यथा दिनकरीटीकायां ‘अन्यथा’ इति पदस्य विश्लेषणं क्रियते “नानासंस्काराणामेकस्मरणजनकत्वाभावे”[१८] इति।

परन्तु किरणावलीटीकायाम् ‘अन्यथा’ इति पदस्य विश्लेषणम् ईदृशं वर्तते- “अन्यथा=यदि अन्तिमवर्णादेरुद्बोधकत्वं न स्यात् तदा, ‘यज्ञदत्तादिपदेऽपि य ज्ञ द त् त्-प्रभृतिनानावर्णश्रावणानुभवजन्यप्रत्येकसंस्कारैः, अन्तिमवर्णश्रावणकालेऽनुद्बुद्धैः कथमेकं यावद्वर्णानुपूर्व्यवच्छिन्नयज्ञदत्तपदार्थस्मरणं स्यात् ! तथा च सर्वत्र शाब्दबोधानुपपत्तिः । अतः चरमवर्णश्रावणस्य तत्र पूर्वपूर्ववर्णश्रावणानुभवजन्यसंस्काराणामुद्बोधकत्वं मन्तव्यमेव, एवं वाक्येऽपि चरमपदश्रावणस्योद्बोधकत्वम्” इति।

५. प्राचीननैयायिकैः उच्यते यत्, वाक्यस्थितानां पदानां युगपत् समस्थपदार्थाणां ज्ञानं भवति । तस्य उदाहरणरूपेण एका कारिका उल्लिखिता - यथा,

*वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।*
*तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति ॥* इति।

किरणावालीतः ज्ञायते यत्, एषा कारिका उदयनाचार्योक्ता । कारिकायाः सरलान्वयः अत्र क्रियते[१९] । येन कारिका सरलतया अवगम्यते।

अपरस्यां दिनकरीटीकायां अस्याः कारिकायाः विषये केवलम् उक्तं वर्तते –“अत्र वृद्धयुव-शिशुभिः कपोतैश्चिरतरचिरसन्निहितकालोक्तानां पदार्थानां साम्यं बोध्यम्[२०] ” इति । इत्युक्ते अत्र तथ्यस्य न्युतता वर्तते। अतः केवलं दिनकरीटीकां ज्ञात्वा कारिका इयं नावगम्यते।

---

१७. दिनकरी, पृ. ४१३

१८. तदेव

१९. “वृद्धयुवशिशुकपोताः एककालवच्छेद्यखलवृत्तिसंयोगजनकक्रियानुकूलवन्तः, तथैव=वृद्धयुवशिशुकोपतानाम् एककालवच्छेदेन खलपतनवत्, सर्वे पदार्थाः=पदद्वयादिव्यवहितपदोपस्थिताः एकमात्रेण पदोपस्थापिताः अव्यवहितपदोपस्थापिताश्च पदार्थाः, परस्परेण=विशेषण-विशेष्यभावेन, अभेदे तृतीया, तस्य अन्वयपदार्थेकदेशे विषयतायामन्वयः । युगपत्=अवान्तरशाब्दबोधोत्पत्तिसमये, अन्वयिनो भवन्ति=शाब्दबोधनुरूपित-विषयतावन्तो भवन्तीत्यर्थः ।” किरणावली, पृ. ३४३

६. नव्यनैयायिकाः वदन्ति यत्, शाब्दबोधे समूहालम्बनज्ञानस्य कापि आवश्यकता नास्ति। तदर्थं तैः एका करिका उपस्थापिता -

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥ इति।

अस्याः कारिकायाः सरलान्वयः[२१] कृतः किरणावल्याम्। एवं च कारिकातः ज्ञायते यत्, एषा कारिका कानादसूत्रीयप्रशस्तपादभाष्यकारस्य।

अपरस्यां दिनकरीटीकायां वर्तते "स्वार्थकाङ्क्षितं स्वार्थयोग्यं यद्यत्सन्निधानं प्रपद्यते स्वार्थोपस्थितिविषयो भवति तेनतेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते। अतन्तरं च महावाक्यार्थबोध इत्यर्थः। एवंच पूर्वोक्तसमूहालम्बनात्मकं पदार्थस्मरणं विनापि निर्वाह इति भावः" इति[२२]।

**मुक्तावली**

*इदन्तु बोध्यम् यत्र द्वारमित्युक्तं, तत्र पिधेहीति पदस्य ज्ञानादेव बोधः, न तु पिधानादिरूपार्थज्ञानात्; पदजन्यतत्तत्पदार्थोपस्थिते-स्तत्तच्छाब्दबोधे हेतुत्वात्। किञ्च क्रिया-कर्म-पदानां तेन तेनै सह साकाङ्क्षात्वम्, तेन क्रियापदं विना कथं शाब्दबोधः स्यात्। तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहारः आवश्यकः।*

## ▪ टीकाद्वयस्य तुलना

१. *"यत्र द्वारमित्युक्तं, तत्र पिधेहीति पदस्य ज्ञानादेव बोधः, न तु पिधानादिरूपार्थज्ञानात्"* मुक्तावल्याः अस्य ग्रन्थांशस्य विश्लेषणं कृतं किरणावल्यां "तदा शाब्दबोधविषय-यादृशार्थतात्पर्येण 'द्वारमि'तिवाक्यमुच्चारितं, तदा तादृशतात्पर्यार्थविषयकः, 'पिधेही'-

---

२०. दिनकरी, पृ.४१४

२१. "यत्(अम्)पदं यत्पद(घट)साकांक्षं यत्पदार्थाऽबाधितार्थकत्वरूपयोग्यतावत् यत्पदनिरूपिताऽऽसत्तिमत् प्रतपद्यत ज्ञायत। एतेन खण्डवाक्यार्थ-जनकाकांक्षादिज्ञानसम्पत्तिर्दर्शिता। तेन अन्वितः=तत्पदार्थाः (घटपदार्था)न्वयविशिष्टः , स्वार्थाः=अम्पदार्थाः कर्मत्वं, पदैरेव=घटपदाऽम्पदार्था-भ्यामेव, प्रथमं खण्डवाक्यार्थतया, अवगम्यते=जायते।" किरणावली, पृ. ३४३

२२. प्रागुक्तम्

त्यध्याहृतपदज्ञानादेव पिधानार्थस्मृतिसत्त्वे'द्वारकर्मकपिधानानुकूलकृतिमाँस्त्वमि'तिबोधो जायते, न तु अध्याहृतस्य पिधानार्थस्य स्मृतिमात्रादित्यर्थः"[२३] इति ।

अपरस्यां दिनकरीटीकायाम् अस्य ग्रन्थांशस्य विषये तादृशविश्लेषणं किमपि नास्ति ।

२. अस्माभिः दृष्टं यत्, वक्तुः तात्पर्यानुसारेण आकाङ्क्षानुसारेण च पदस्य अध्याहारः करणीयः । कारणं, शाब्दबोधे पदजन्यपदार्थोपस्थितिरेव कारणम्, अन्योपायेन पदार्थोपस्थितिः न कारणम् । अतः 'द्वारम्' इति उक्ते सति वक्तुः तात्पर्यानुसारेण आकाङ्क्षानुसारेण च 'पिधेही'ति पदस्य अध्याहारः करणीयः । तथा क्रियते सति शाब्दबोधः भवेत् । परन्तु श्रोतुः पिधानादिरूपपदार्थज्ञानद्वारा शाब्दबोधः न वाञ्छनीयः । किमर्थं तथा न, तस्य कारणं मुक्तावल्याम् उच्यते 'पदजन्यतत्तत्पदार्थोपस्थितेस्तत्तच्छाब्दबोधे हेतुत्वात्'[२४] इति । ग्रन्थांशस्यास्य पूर्वपक्षवत् प्रश्नकरणपूर्वकम् व्याख्यायते किरणावल्याम् "ननु कथम् अध्याहृतपिधानस्मरणं न हेतुरित्यत आह – पदजन्येति । केवलपदार्थस्मृतित्वेन शाब्दबोध-हेतुत्वे प्रत्यक्षादिना उपस्थितानां तत्तत्पदार्थानां पदज्ञानं विनैव शाब्दबोधापत्तिः स्यादतः – 'वृत्तिज्ञानसहकृततत्तत्पदज्ञानजन्यतत्तत्पदार्थस्मृतित्वेनैव तत्तदर्थशाब्दबोधकारणत्वस्य सिद्धा-न्तितत्वादित्यर्थः"[२५] इति ।

अपरस्यां दिनकरीटीकायां विषयोऽयं संक्षेपेण उपस्थापितम् "पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षादिनोपस्थितस्यापि शाब्दबोधापत्तिरिति भावः"[२६] इति ।

## मुक्तावली

***पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥८३॥***

*योग्यतां निर्वक्ति पदार्थ इति । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न सम्भवति, वाक्यार्थस्यापूर्वत्वादिति चेत् । न ।*

---

२३. किरणावली, पृ. ३४४

२४. भाषापरिच्छेदः(मुक्तावली), सम्पा. अनामिका राय चौधुरी, पृ. २७१

२५. प्रागुक्तम्, पृ. २४४-२४५

२६. दिनकरी, पृ. ४१८

*तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् । नव्यास्तु योग्यताया ज्ञानं न शाब्दबोधे कारणम् । वह्निना सिञ्चतीत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः, तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्भानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् । योग्यताज्ञान-विलम्बाच्च शाब्दबोधविलम्बो- ऽसिद्ध इत्याहुः ।*

## ▪ टीकाद्वयस्य तुलना

१. योग्यताविषये कारिकायाम् उक्तं वर्तते यत्, '*पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता* " इति । कारिकायाः अस्याः अन्वयपूर्वकं व्याख्यायते किरणावल्याम्[२७] । तत्र 'पदार्थे तत्र तद्वत्ता' इति ग्रन्थांशस्य विश्लेषणं गुरुत्त्वपूर्णम् । तत्र 'तत्र' इति पदस्य अर्थः क्रियते पदार्थे । अतः 'पदार्थे पदार्थे तद्वत्ता योग्यता' इति योग्यतालक्षणं भवति । तत्र पुनः विश्लेषणं क्रियते- " पूर्वपदार्थे परपदार्थवत्ता परपदार्थे पूर्वपदार्थवत्ता वा योग्यता " इति ।

अपरस्यां दिनकरीटीकायां कारिकास्थयोग्यतालक्षणस्य किमपि विश्लेषणं न क्रियते ।

२. मुक्तावल्यां कारिकास्थितलक्षणस्य विश्लेषणं क्रियते – '*एकपदार्थोऽपरपदार्थसम्बन्धो योग्यता* ' इति । किमर्थम् ईदृशं व्याख्यायते तस्य 'कारणं' दिनकरी किरणावली उभयत्र क्रियते ।

दिनकरीटीकायाम् उक्तं वर्तते –" मूले पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तितेत्यनेन तत्तत्प- दार्थे तत्तत्पदार्थवत्त्वं योग्यतेत्युक्तं तच्चायुक्तम् अनुपयुक्तं च । स्वस्मिन् स्वाधिकरणकत्वा- भावात् तज्ज्ञानस्य शाब्दबोधे हेतुत्वाभावाच्चेत्यतः प्रथमं तत्पदमेकपदार्थपरं द्वितीयं च तत्पदमपर- पदार्थपरमित्यभिप्रायेण व्याचष्टे – एकपदार्थ इति[२८] ।"

अपरस्यां किरणावल्यां वर्तते –"पदार्थे तत्र तद्वत्ते'तिमूलेन स्वस्मिन् स्ववत्त्वं योग्यता लभ्यते तज्ज्ञानस्य प्रकृताऽनुपयोगात् तदर्थमाह - एकपदार्थे इति[२९]" इति ।

---

२७. "योग्यतां दर्शयति मूले-पदार्थे तत्रेति । 'तत्र' पदमपि पदार्थे इत्यर्थकम्, तथा च पदार्थे पदार्थे तद्वत्ता=पदार्तवत्ता, पूर्वपदार्थे परपदार्थवत्ता वा योग्यता इत्यर्थः, एकपदार्थानुयोगिकाऽपरपदार्थप्रतियोगिसम्बन्धो योग्यतेति यावत् । यथा 'पयसा सिञ्चती'त्यत्र सेचनपदार्थे पयः करणकत्वात्मकार्थवत्त्वाऽव्यवहितोत्तरत्वेन वर्तते इति योग्यतावत्त्वात् पयःकरणकसेकानुकूलव्यापारानुकूलकृतिमानिति बोधो जायते इति भावः ।" किरणावली, पृ. ३४५

२८. दिनकरी, पृ. ४२०

२९. प्रागुक्तम्, पृ. ३४६

३. योग्यताज्ञानं शाब्दबोधस्य न कारणम् । कारणं सदा कार्यस्य पूर्वे भवति । अस्मिन् क्षेत्रे शाब्दबोधात् परं योग्यताज्ञानं भवति । अतः योग्यताज्ञानं न शाब्दबोधस्य पूर्ववर्ति । एवं मीमांसाकानां मतम् अस्ति । अतः मुक्तावल्याम् उक्तं वर्तते " *नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक्सर्वत्र न सम्भवति, वाक्यार्थस्यापूर्वत्वादिति " इति ।* अस्य ग्रन्थांशस्य 'वाक्यार्थस्यापूर्वत्वाद्' इति पदस्य व्याख्या महत्त्वपूर्णा ।

किरणावल्यां 'वाक्यार्थस्यापूर्वत्वाद्' इति पदस्य व्याख्या ईदृशा वर्तते "वाक्यघटकपदार्था-न्वयस्य, अपूर्वत्वात्=पूर्वम् अनिश्चितत्वेन मीमांसकमते स्वीकारादित्यर्थः, अनधिगतार्थ-गन्तृत्वं प्रमाणमिति सिद्धान्तेन पदार्थानामन्वयो योग्यतात्मको योग्यताज्ञानविषयतया शाब्दबोधात्पूर्वे नैवाङ्गीकर्तव्यः, तथा सति योग्यताज्ञानेनाऽधिगतस्य तस्य पुनः शाब्द-बोधात्मकाऽधिगमजनकतया पदज्ञाने प्रमाणत्वाऽभावेन शाब्दबोधस्य प्रमात्वाऽनुपपत्तिः स्यात् अतः योग्यताज्ञानं न करणमिति भावः" [३०]इति ।

अपरस्यां दिनकरीटीकायाम् अस्य ग्रन्थांशस्य केवलं 'अपूर्वत्वाद्' इति पदस्य व्याख्या क्रियते - "सर्वत्र शाब्दबोधात् पूर्वमनिश्चितत्वादित्यर्थः" [३१]इति ।

४. "*तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात् ।*" मुक्तावल्याः अस्य ग्रन्थांशस्य 'तत्तत्पदार्थस्मरणे' इति पदस्य विश्लेषणं महत्त्वपूर्णम् । किरणावल्याम् अस्य ग्रन्थांशस्य विश्लेषणम् ईदृशं क्रियते -"प्रकृतवाक्यघटकतत्तत्पदविषयक-वृत्तिज्ञानसहकृतपदज्ञानजन्यतत्तत्पदार्थविषयकस्मरणे जायमाने" [३२]इति ।

इतोऽपि उदाहरणेन सह 'क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात्" इत्यस्य व्याख्या[३३] अपि किरणावल्यां क्रियते ।

---

३०. किरणावली, पृ.३४६

३१. दिनकरी, पृ. ४२०

३२. प्रागुक्तम्

३३. क्वचित्='नीलो घटो द्रव्यं पट'इत्यादौ नीलपदार्थघटपदार्थान्वये, संशयरूपस्य='प्रथमान्तघटपदार्थे प्रथमान्तनीलपदार्थान्वयो 'न वा' इति संशयात्मकस्य योग्यताज्ञानस्य, अथ च क्वचित्='घटमानये'त्यादौ तु लोडन्तानयपदार्थे द्वितीयान्तघटपदार्थान्वयस्य निरूपितत्वस्य निश्चयात्मकस्यैव योग्यताज्ञानस्य संभवात्=अवश्यं ज्ञायमानत्वात्, अतः योग्यताज्ञानं संशयनिश्चयसाधारणम्, अवश्यं शाब्दबोधे कारणमिति मन्तव्यम् ।" तदेव

अपरस्यां दिनकरीटीकायां 'तत्तत्पदार्थस्मरणे' इति पदस्य व्याख्या न क्रियते । परन्तु "*क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात्*" इति ग्रन्थांशस्य व्याख्या अत्र क्रियते –"क्वचित्संशयस्येति । संशयनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुत्वादिति भावः । अतएव निश्चयमपि दर्शयति- क्वचिदिति । भूतले घट इति प्रात्यक्षिकनिश्चयोत्तरभाविनि शाब्दबोध इत्यर्थः"[३४] इति ।

५. अस्माभिः दृष्टं यत्, शाब्दबोधस्य कारणं न योग्यताज्ञानम् इति नव्यनैयायिकानां मतम् । तेषां मते अयोग्यतायाः निश्चयात्मकज्ञानाभावरेव शाब्दबोधस्य कारणमिति । अयोग्यतायाः निश्चयात्मकज्ञानं शाब्दबोधस्य प्रतिबन्धकः । प्रतिबन्धकाभावः कार्यस्य कारणं भवतीति साधारणनियमानुसारेण 'अयोग्यतायाः निश्चयात्मकज्ञानाभावरेव शाब्दबोधस्य कारणं' न तु योग्यताज्ञानं शाब्दबोधस्य कारणम् ।

कस्यापि विषयस्य अभावस्य दृढप्रतीतिः तद्विषयस्य ज्ञानोत्पत्तौ प्रतिबन्धकस्य सृष्टिं करोति । यथा, 'भूतले घटाभावः' ईदृशदृढप्रतीतिः 'भूतले घटोऽस्ति' ईदृशज्ञानस्य प्रतिबन्धकः । नियमस्यास्य व्यतिक्रमद्वयं वर्तते । प्रथमतः, ज्ञानं यदि लौकिकसन्निकर्षजन्यं भवति, तर्हि कापि अभावदृढप्रतीतिः प्रतिबन्धकस्य सृष्टिं न करोति । द्वितीयतः, ज्ञानं यदि इन्द्रियदोषजन्यं स्यात्, तदापि कापि अभावदृढप्रतीतिः प्रतिबन्धकस्य सृष्टिं न करोति । व्यातिक्रमद्वयस्य सोदारणं व्याख्या दिनकरीटीकायां[३५] क्रियते । यद्यपि किरणावल्याम् अनेकोदाहरणेन सह व्याख्यायते[३६] । अस्मिन् विषये किरणावल्याः विश्लेषणम् उत्तमं वर्तते ।

## मुक्तावली

***यत्पदेन विना यस्याननुभावकता भवेत् ।***
***साकाङ्क्षा, वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥८४॥***

---

३४. दिनकरी, पृ. ४२०

३५. वाधनिश्चयकालेऽपि लौकिकसन्निकर्षजन्यतद्विशिष्टबुद्धेरुदयादाह-लौकिकसन्निकर्षजन्येति । शङ्खो न पीत इति निश्चयोऽपि पितादिदोषवशात् पीत शङ्ख इति प्रत्यक्षोदयात् दोषविशेषजन्येत्युक्तम् । तदेव, पृ. ४२०-४२१

३६. लौकिकसन्निकर्षजन्य'पीतः शङ्ख'इतिज्ञानस्य 'पीतो न शङ्ख'इति निश्चये सत्यपि जायमानत्वात् व्याभिचारवारणाय प्रतिबन्धकोटौ-लौकिकसन्निकर्षाऽजन्येति । मण्डुकवसाऽञ्जनदोषवशाज्जन्यस्य रज्जौ सर्पज्ञानस्य 'नायं सर्प' इति निश्चयसत्त्वेऽपि जायमानत्वात् व्याभिचारवारणाय प्रतिबन्धकोटौ-दोषविशेषाजन्येति ।" किरणावली, पृ. ३४७

*आकाङ्क्षां निवक्ति – यपदेनेत्यादि । येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा । वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थम् । परन्तु घटकर्मतबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम् । तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यता-मित्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात् तेनैवान्वौयबोधः । पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव ।*

- **टीकाद्वयस्य तुलना**

१. आकाङ्क्षायाः लक्षणं कृतं कारिकायां "*यत्पदेन विना यस्याननुभावकरा भवेत्*" इति । कारिकास्थिरलक्षणस्य सोदाहरणं व्याख्यायते किरणावल्याम् । यथा, "यत्पदेन विना=अम्-पदेन विना, यस्य=यद्घटपदस्य, अननुभावकता=शाब्दबोधात्मकानुभवाऽ– जनकता भवेत्, तस्मिन् अम्पदे घटपदवत्त्वं, घटपदे वा अम्पदवत्त्वम् आकाङ्क्षेत्यर्थः"[३७] इति ।

पुनः अपरलक्षणमेकम् उल्लिख्यते किरणावल्याम् । यथा, "अन्ये तु- एकपदार्थज्ञाने तदर्था-न्वययोग्यताऽपरपदार्थस्य यज्ज्ञानं तद्विषयिणीच्छा- आकाङ्क्षेति वदन्ति"[३८] इति ।

पुनः तृतीयवारम् कारिकास्थितस्य आकाङ्क्षालक्षणस्य व्याख्यानं कृतं किरणावल्याम् । यथा, "यत्पदेने'त्यादिमूलेन 'यत्पदाभावप्रयुक्ते यत्पदनिष्टशाब्दबोधजनकत्वाभावः तत्पदाऽभाव एवाकाङ्क्षा इत्यर्थो लभ्यते"[३९] इति ।

अपरस्यां दिनकरीटीकायां कारिकास्थितलक्षणस्य किमपि विश्लेषणं नास्ति । तत्र आकाङ्क्षायाः अवबोधने सोदाहणम् ईदृशं व्याख्यानं कृतम् । यथा, "घटमानयेत्यत्र घटपदं विना अम्पदस्यान्वयाननुभावकत्वात् घटपदविशिष्टमम्पदे आकाङ्क्षा । घटः कर्मत्वमित्यादौ कर्मत्वपदे घटपदक्त्वं तु नाकाङ्क्षा, कर्मत्वपदे घटीया कर्मतेति शाब्दबोधाननुभावकत्वस्य घटपदविरहाप्रयुक्तत्वात् "[४०] इति ।

---

३७. किरणावली, पृ. ३४८

३८. तदेव

३९. तदेव

४०. दिनकरी, पृ. ४२४

२. *"क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा"* इति ग्रन्थांशस्य प्रत्येक-पदस्य सोदाहरणं व्याख्यायते किरणावल्याम् । यथा, तिङन्तनीड्पदं विना कारकपदं=कर्म-तान्तादिपदं घटमिति 'घटकर्मतानिरूपकनयनानुकूलकृतिमाँस्त्वमिति अन्वय-बोधं न जनयतीति, तेन=क्रियापदेन सह कर्मादिपदस्य, अव्यवहितोत्तरत्वाऽव्यवहितपूर्वत्वान्यतर-सम्बन्धेन तत्पदवत्त्वमाकांक्षेत्यर्थः"[४१] इति ।

परन्तु दिनकरीटीकायां ग्रन्थांशस्यास्य किमपि विश्लेषणं न कृतम् । केवलं पदद्वयस्य विश्लेषणं कृतम् । यथा, "तेन क्रियापदेन । तस्य कारकपदस्य"[४२] इति । इदं पदद्वयस्य विश्लेषणं ग्रन्थांश-स्यास्य अवबोधने न पर्याप्तम् इति अहं मन्ये ।

३. अत्र अवधेयं यत्, आकाङ्क्षाविषये मुक्तावल्यां वर्तते *'वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थम्"* इति । इत्यस्य विश्लेषणं किरणावल्यां दिनकरीटीकायां प्रायः समानं दृश्यते । दिनकर्य्यां वर्तते "अत्र चैकपदेऽपरपदवत्त्वमपरपदाव्यवहितोत्तरत्वम् । तत्र च अव्यवधानांशस्यासत्त्यैव लाभः । आसत्तेः पदाव्यवधानरूपतायाः पूर्वमुपवर्णितत्वात् । उत्तरत्वं च क्रियाकारकपदयोर्नापेक्षितम् । चैत्रः पचति पचति चैत्र इति वाक्यद्वयादप्यन्वयबोधादतः क्रियाकारकपदयोराकाङ्क्षा नास्त्येव । किन्तु प्रकृतिप्रत्यययोरेव । तत्राप्यव्यवधानांशस्यासत्त्या लाभात् प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाज्ञानकारणमित्याह – वस्तुतस्त्वित्यादिना"[४३] इति ।

प्रायः समानं विश्लेषणं किरणावल्यामपि वर्तते "अथ 'घटं नय'इत्यादौ एकपदेऽपरपदवत्त्वम् अव्यवहितोत्तरपूर्वान्यतरपदवत्त्वमेव, तत्राऽव्यवधानांशस्यासत्त्यैव लाभः, आसत्तेः पदाऽव्यवधानरूपतायाः पूर्वं निरूपितत्वात्, उत्तरत्वादिकं तु अनियतत्वेन नापेक्षितमेव । 'घट नय नय घटमि'तिरीतिद्वयेनापि अन्वयबोधात्, तथा च क्रियाकारकपदयोरासत्त्या चरितार्थत्वात् तत्राऽऽकांक्षा नास्त्येव इति क्रियाकारकयोः साकांक्षात्वं नोपपद्येतेतत्याशंकामिष्टापत्त्य परिहरति – वस्तुतस्त्वति"[४४] इति ।

---

४१. किरणावली, पृ. ३४९
४२. दिनकरी, पृ. ४२४
४३. तदेव
४४. प्रागुक्तम्, पृ. ३५२

## मुक्तवली

*तात्पर्यं निवर्त्ति – वक्तुरिच्छेति । यदि तात्पर्यज्ञानं कारणं न स्यात्, तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति नियमो न स्यात् । न च तात्पर्यग्राहकाणां प्रकरणादीनामेव शाब्दबोधे कारणत्वमस्त्विवति वाच्यम् । तेषामनुगमात् । तात्पर्यज्ञान- जनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात् कारणमस्तु । ईत्थञ्च वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते । न च तत्राध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम् । सर्गादावध्यापकाभावात् । न च प्रलय एव नास्तीति कुतः सर्गादिति वाच्यम् । प्रलयस्यागमेषु प्रतिपद्यत्वात् । ईत्थञ्च शुकवाक्येऽपीश्वरीयतात्पर्यज्ञानं कारणम् । विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणं वाच्यम् । अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम् । तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः । वेदे त्वनादिमीमांसापरिशोधिततर्कैर्थावधाराणमित्याहुः ।*

## ■ टीकाद्वयस्य तुलना

१. भाषापरिच्छेग्रन्थे कारिकायां तात्पर्यस्य लक्षणं क्रियते “*वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्*” इति । कारिकास्थिरलक्षणाद् ज्ञायते यत्, वक्तुरिच्छा एव तात्पर्यम् इति । परन्तु कीदृशेच्छा ? किरणावलीतः ज्ञायते यत्, “एतत्पदादेतर्थो भवतु” इति प्रयोक्तृसमवेता इच्छा तात्पर्यमित्यर्थः”[४५] इति ।

अपरस्यां दिनकरीटीकायां भिन्नरूपेण ‘तात्पर्यस्य’ व्याख्या क्रियते । तत्र उल्लिख्यते “घटमानयेत्यादौ कर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यम्”[४६] इति । अत्र दिनकरमहाभागेन उच्यते यत्, न केवलं द्व्यर्थबोधकवाक्ये अपि तु अ-द्व्यर्थबोधकवाक्येऽपि तात्पर्यज्ञानं कारणं स्यात् इति । ‘घटमानय’ इत्यत्र द्व्यर्थकता नास्ति, तथापि वक्तुः तात्पर्यज्ञानम् अस्य वाक्यस्य अथप्रकाशे सहायतां करोति । ‘घटमानय’ इत्यत्र कर्मत्वविशेष्यकाधेयता- संसर्गकघटप्रकारकज्ञानं वक्तुम् इष्यते ।

२. मुक्तावल्याम् उक्तं वर्तते यत्, “ *यदि तात्पर्यज्ञानं कारणं न स्यात्तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात्*” इति । इति ग्रन्थांशस्य किरणावल्याः विश्लेषणं क्रमानुसारं सुशृङ्खलं सम्पूर्णं च वर्तते । यथा, “यदि तत्प्रतीतीच्छयोच्चरितत्वरूपस्य

---

४५. किरणावली, पृ. ३५१

४६. दिनकरी, पृ. ४२७

तात्पर्यस्य ज्ञानं शाब्दबोधे कारणं न स्यात् तदा, 'सैन्धवमानयेत्यादिनानार्थशक्तिकपदघटित-वाक्यात्, क्वचित्=अश्वतात्पर्यग्राहकप्रयाणप्रकरणे सति अश्वस्य, क्वचित्=लवणतात्पर्यग्रहक-भोजनप्रकरणे सति, लवणस्यैव बोधः इति नियमो न स्यादित्यर्थः । एवम् अश्वलवणबोधौ-पयिकसामग्र्याः अविशिष्टत्वात् सर्वदा अश्वलवणयोर्बोधः स्यात्''[४७] इति ।

अपरस्यां दिनकरीटीकायां ग्रन्थांशस्यास्य क्रमानुसारं सुशृङ्खलं सम्पूर्णं विश्लेषणं नास्ति । तत्र वर्तते ''तत्र युक्तिमाह - सैन्धवेति । आदिना श्वेतो धावतीत्यादिपरिग्रहः । तत्र कदाचित् श्वेतगुणविशिष्टस्य, कदाचित् कुक्कुरादेर्बोधस्य तात्पर्यज्ञाननियम्यत्वात् । क्वचिल्लवणस्येति । क्वचित्तदुभयोरित्यपि बोध्यम् । इति न स्यादिति । इति नियमो न स्यादित्यर्थः''[४८] इति ।

३. मुक्तावल्यां प्रकरणादि न तात्पर्यग्राहकम् इति उक्तम् । परन्तु प्रकरणं किम्, आदिपदेन किं ज्ञायते इत्यादिविषयानाम् अवबोधनार्थं टीकाग्रन्थस्य आवश्यकता वर्तते । तत्र किरणावल्यां 'प्रकरणदिपदस्य' सोदाहणं व्याख्यायते । आदिपदेन किरणावल्यां 'विशेषण-संयोग-विभाग-साहचार्यऽऽभिमुख्यचेष्टादीनाम् उपस्थापनं क्रियते[४९] ।

अपरस्यां दिनकरीटीकायां 'प्रकरणादि' इति पदस्य विश्लेषणं किमपि न क्रियते । केवलं तत्र 'आदि' इति पदेन 'संयोगवियोगसाहचार्यादीनाम्' उपस्थापनं क्रियते[५०] ।

४. विश्वनाथमहाभागेन वेदवाक्यस्य तात्पर्यग्रहणे ईश्वरस्य कल्पना क्रियते । यतो हि, वेदः अपौरुषेयः, अतः केनापि मनुष्येन वेदो न रचितः अभवत् । तस्मात् मनुष्यः वेदवाक्यस्य तात्पर्यजनकः न भवितुं शक्यते । यद्यपि वेदवाक्यस्य तात्पर्यजनकेश्वरप्रसङ्गे दिनकरीटीकायां किमपि वक्तव्यं नास्ति । परन्तु किरणावलीटीकायाम् वेदवाक्यस्य तात्पर्यजनकरूपेण ईश्वरसिद्धिः प्रणिधानयोग्यः । तत्र वर्तते ''वेदवाक्याधीनशाब्दबोधः तदर्थतात्पर्यज्ञानजन्यः

४७. किरणावली, पृ. ३५१

४८. दिनकरी, पृ. ४२७

४९. '' प्रकरणादिकं तात्पर्यग्राहकं, भोजनप्रकरणं यथा 'सैन्धवमानये'त्यत्र लवणार्थोच्चरितत्वात्मकतात्पर्यग्राहकम्, आदिपदेन विशेषण-संयोग-विभागसाहचर्याऽऽभिमुख्यचेष्टादीनामपि तात्पर्यग्राहकत्वं बोध्यम्, सकेसरो गर्जनघटकारी मृगाधिराजो हरिरेत्यतस्तादि'त्यत्र सकेसरत्वादि-विशेषणत्रयं हरिपदस्य सिंहे तात्पर्यग्राहकम् । 'घटोऽपसरणीय'इत्यत्र घटपदस्य समीपस्थघटे तात्पर्यग्रहः संयोगात्=सामीप्यात् । 'घटमानये'त्यत्र घटपदस्य दूरस्थघटे तात्पर्यग्रहो वियोगात्=दूरत्वात्'' इत्यादि । तदेव

५०. ''प्रकरणेति । आदिना संयोगवियोगसाहचर्यादीनां परिग्रहः ।'' प्रागुक्तम्, पृ. ४२८

शाब्दबोधात्, सैन्धवमानयेत्यादिवाक्याधीनशाब्दवदि'त्यनुमानात् तात्पर्यज्ञानसिद्धौ, जीव-सिद्धमुक्तादीनां बाधाद् यस्य तादृशतात्पर्यज्ञानं स ईश्वरः सिद्ध एवेति भावः"[५१] इति।

५. तात्पर्यविषये मुक्तावल्यां वर्तते '*प्रलयस्यागमेषु प्रतिपद्यत्वात्*' इति । अस्य ग्रन्थांशस्य विश्लेषणम् उदाहरणरूपेण वेदवाक्यानाम् उपस्थापनं टीकाद्वये प्रायः समानं दृश्यते । दिनकरीटीकायां केवलम् एकवेदवाक्यस्य उपस्थापनं क्रियते। यथा, "नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्य"[५२] इति।

किरणावल्यां दिनकरीटीकायाः समानं वेदवाक्यम् उपस्थाप्यते। पुनश्च द्वितीयं वाक्यमपि तत्र उल्लिख्यते[५३]। अर्थात् तथ्यस्य आधिक्यं न्यूनता वा वर्तते। अस्मिन् विषये किरणावल्याः विश्लेषणं महत्त्वपूर्णम् इति अहं मन्ये।

************

५१. किरणावली, पृ. ३५२

५२. दिनकरी, पृ. ४२७-४२८

५३. "खण्डप्रलयस्य आगमेषु शास्त्रेषु 'धाता यथापूर्वम् अकल्पयत्', नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यादि'त्याद्यागमप्रतिपाद्यत्वात्--------।" प्रागुक्तम्

# उपसंहारः

एतावद् अस्माभिः दृष्टं यत्, शब्दप्रमाणविषयो न सरलोऽपि तु कठिनः एव । शब्दप्रमाणविषये सम्यक् ज्ञानं प्राप्तुं शब्दप्रमाणस्य ये विषयाः सन्ति तेषां सम्यक् ज्ञानमर्जनीयम् । शब्दप्रमाणस्य ये विषयाः सन्ति, यथा, पदज्ञानं करणं, ज्ञायमानपदं न करणं, वृत्तिः, शक्तिः, लक्षणा, पदं, वाक्यार्थबोधस्य सहकारिकारणानि इत्यादि सर्वविषयाः तृतीयाध्याये सहजसरलभाषया अलोचिताः अभवन् । तस्मात् शब्दप्रमाणविषये सम्यक् ज्ञानं भवितुं शक्यते । अर्थात् मूलो यो विषयः, टीकाद्वयस्य तुलनात्मकसमीक्षा इत्यस्य अध्ययनात्पूर्वं तृतीयाध्याये आलोचितं शब्दप्रमाणं पाठकानां सहायकः भविष्यति इति अहं मन्ये ।

अधुना चतुर्थाध्याये टीकायाद्वयस्य या तुलनात्मकसमीक्षा आलोचिता ताम् आधारीकृत्य टीकाद्वयस्य मूल्यांकनं कृत्वा उपसंहारः विरम्यते ।

प्रथममेव आलोचितं यत् भाषापरिच्छेदग्रन्थस्य दिनकरीटीका प्राचीना, किरणावलीटीका तु अर्वाचीना । दिनकरीटीकायां मुक्तावल्याः सर्वपदानि न आलोचितानि, प्रयोजनानुसारं पदानाम् आलोचनं क्रियते । संक्षेपेण मूलविषयः अत्र उपस्थाप्यते । यतो हि संक्षेपेण विषयोपस्थापनम् अत्र क्रियते, अतः केषाञ्चन विषयानाम् अवबोधने काठिन्यम् अनुभूयते । अर्थात् दिनकरीटीका अतिगूढार्थां कठिना च । तस्मात् दिनकरीटीकायाः अवबोधने रामरुद्रीटीका प्रसिद्धा । अर्थात् रामरुद्रीं विहाय दिनकरीटीका नावगम्यते ।

किरणावलीटीकाम् अध्ययनं कृत्वा मया एतद् अवगतं यत्, एषा टीका भाषापरिच्छेदग्रन्थस्य पूर्ववर्तिटीकानां सङ्कलनमेव । यद्यपि पूर्ववर्तिटीकानाम् अध्ययनं मया न कृतं, तथापि दृष्टं यत्, दिनकरीटीकायाः समानबहुविषयाः अत्र समुपलभ्यन्ते । दिनकरी-किरणावलीटीकयोः काश्चित् पङ्क्ततः समाना एव । न केवलम् दिनकरीटीकायाः पङ्क्तिः अत्र समुपलभ्यते अपि तु दिनकरीटीकायाः टीका रामरुद्री इत्यस्याः पङ्क्तिः अपि प्राप्यते । अतः अनुमियते यत्, एषा किरणावली टीका सङ्कलनम् एव ।

किरणावलीटीकायां भाषापरिच्छेदग्रन्थस्य शब्दप्रमाणस्य याः कारिकाः सन्ति तेषां कारिकास्थितानां पदानां सर्वेषां व्याख्या अत्र क्रियते। न केवलं कारिकास्थितपदानाम् अपि तु मुक्तावल्याः सर्वेषां वाक्यानां क्वचित् सर्वेषां पदानामपि व्याख्या अत्र क्रियते । यद्यपि विषयानां व्याख्या अत्र क्रियते किन्तु सकलविषयानां व्याख्या अत्र दीर्घायिता क्रियते । सरलभाषया संक्षपेण च व्याख्या अत्र न क्रियते । अतः एतां टीकाम् अधीत्य केषाञ्चन विषयानाम् अवबोधने काठिन्यम् अनुभूयते। परन्तु कारिकानां मुक्तावल्याः च सम्पूर्णव्याख्या धारावाहिकरूपेण सुशृङ्खलरूपेण च अत्र प्राप्यते। अयमेव अस्याः टीकायाः विशेषः।

अन्तिमे स्वस्य अभिमतानुसारेण अत्र वक्तुं शक्यते यत्, भाषापरिच्छेदग्रन्थस्य शब्दप्रमाणस्य अवबोधने दिनकरी रामरुद्री च प्रसिद्धे। केवलं दिनकरीं वा रामरुदीं वा पठित्वा शब्दप्रमाणं न अवगम्यते, तत्र दिनकरी रामरुदी टीकाद्वयमेव पठनीयम्। इदं टीकाद्वयं न पठित्वा यदि केवलं किरणावलीं पठित्वा भाषापरिच्छेदस्य शब्दप्रमाणस्य सम्यग्ज्ञानं कोऽपि लब्धुम् इच्छति चेद् लब्धुं शक्नोति।

***********

# *विमर्श-ग्रन्थपञ्जी*


***मूलग्रन्थाः***

विश्वनाथ, *भाषापरिच्छेदः*, सम्पा. अनामिका राय चौधुरी, कलकाता: संस्कृत पुस्तक भाण्डार,1421 (वङ्गाब्द 5म प्रकाश), (1411 प्रथमप्रकाशः), मुद्रणम् ।

विश्वनाथ, *न्यायसिद्धान्तमुक्तावली* (किरणावली टीका सहिता), व्याख्या. प० श्रीकृष्णवल्लभाचार्य, वाराणसी-१:चौखम्बा संस्कृत सीरीज आफिस, 2028 (वि० संवत्, द्वितीय संस्करणम्) ।

विश्वनाथ, *कारिकावली* (न्यायमुक्तावलीसंवलिता दिनकरी-रामरुद्री सहिता ), सम्पा. आत्माराम नारायण जेरे, नव देहली: राष्ट्रीय संस्कृत संस्थान, 2002 (पुनर्मुद्रणम्) ।

***सहायकग्रन्थाः***

अन्नंभाट्ट, *तर्कसंग्रहः* (दीपिका समन्वित), सम्पा. नारायण चन्द्र गोस्वामी, कलकाता: संस्कृत पुस्तक भाण्डार, 1413 (बङ्गाब्द), (1410 तृतीय संस्करणं ), मुद्रणम् ।

अन्नंभाट्ट, *तर्कसंग्रहः* (दीपिका समन्वितः कृष्णावल्लभाचार्यस्य किरणावलीटीका समन्वितश्च), सम्पा. वामाचरण भट्टाचार्यः, बेनारस(अधुना वाराणसी-१):चान्नुलाल ज्ञानचन्द्र पाठक, 1940, मुद्रणम् ।

ईश्वकृष्ण, *सांख्यकारिका* (स्वामी नाराणस्य, गौडपादाचर्यस्य टीकासमन्विता; वाचस्पतिमिश्रस्य तत्त्वकौमुदीसमन्विता; कृष्णवल्लभाचार्यस्य किरणावलीसमन्विता च ), व्याख्याकारः. कृष्णवल्लभाचार्यः, वाराणसी:व्यास प्रकाशण, 1981(द्वितीय संस्करणम्) ।

गौतम, *न्यायदर्शनम्* (प्रथमखण्ड), सम्पा. फणिभूषण तर्कवागीश, कलकाता: पश्चिमबङ्ग राज्य पुस्तक पर्षत्. 2014(चतुर्थ प्रकाशः)( 1981 प्रथम प्रकाशः), मुद्रणम्।

घोष, रघुनाथ , *न्याय दर्शने वाक्यार्थबोध*, कलकाता: लेभान्त बुकस्, 2018, मुद्रणम्।

दण्डी, *काव्यादर्शः* (प्रथम परिच्छेद), सम्पा. अनिल चन्द्र वसु, कलकाता: संस्कृत वुक डिपो, 2006 (पुनमुद्रणं), 2002 (प्रथम प्रकाशः), मुद्रणम्।

दास, गुरुचरण(सम्पा.), *मनुसंहिता*, कलकाता: संस्कृत पुस्तक भाण्डार, 1411(प्रथम प्रकाशः), मुद्रणम्।

पतञ्जली, *योगदर्शनम्(स्वामीनारायणभाष्यसहितं, किरणावलीविभूषितया श्रीभोजदेवस्य राजामार्तन्डवृत्तिसहितं च)* व्याख्याकारः श्रीकृष्णवल्लभाचार्यः, वाराणसी:व्यास प्राकशन, 1991 द्वितियप्रकाशः,1931प्रथमप्रकाशः।

मण्डल, प्रद्योत कुमार; मण्डल, केया (सम्पा.), *न्यायसम्मत प्रमाणतत्त्वेर रूपरेखा* , कलकाता: प्रगतिशील प्रकाशक, 2017 (प्रथम संस्करणं), मुद्रणम्।

वन्धोपाध्याय, धीरेन्द्रनाथ(सम्पा.) *संस्कृत साहित्येर इतिहास*, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्, 2005(द्वितीय संस्करणं)(1988 प्रथम संस्करणम्), मुद्रणम्।

वसु, अनिल चन्द्र(सम्पा.), *कौटिलीयम् अर्थशास्त्रम्*, कलकाता: संस्कृत बुक डिपो, 2003 (तृतीय संस्करणम्) (1999 प्रथमसंस्करणं), मुद्रणम्।

विश्वनाथ, *भाषापरिच्छेदः*, सम्पा. पञ्चानन भट्टाचार्य, कलकाता: महाबोधि वुक एजेन्सि,1423(वङ्गाब्द पुनर्मुद्रण,1377 प्रथम प्रकाशः), मुद्रणम्।

विश्वनाथ, *कारिकावली-न्यायमुक्तावलीसम्बलिता*(दिनकरीव्याख्या-रामरुद्रीव्याख्याभ्याम् सनाथीकृता), सम्पा. अनन्तशास्त्री,बम्बे(अधुना मुम्बाइ):निर्णयसागरः, 1916, मुद्रणम्।

विष्णुशर्मा, *हितोपदेश-मित्रलाभः(किरणावली-* संस्कृत-हिन्दीव्याख्योपेतः), व्याख्याकारः.न्यायाचार्य श्रीकृष्णवल्लभाचार्यः, वाराणसी-१: चौखाम्बा संस्कृत सीरीज

अफिस्, 1958(अष्टम प्रकाशणम्), मुद्रणम्।

शाह,एम० बी०; चतुर्वेदी सीताराम(सम्पा.), *अभिनन्दग्रन्थ-श्रीकृष्णवल्लभाचार्यमहारज,* सौराष्ट्र(अधुना गुजराट):सरपञ्च श्रीलक्ष्मणभाई पटेल साहेब आदि,2038 विक्रमसंवत् (July 17,1981), प्रथम-प्रकाशः, मुद्रणम्।

श्रीलौगाक्षिभास्करः, *अर्थसंग्रहः(किरणावलीसहितो),* व्याख्याकारः श्रीकृष्णवल्लभाचार्यः, वाराणसी:चौखाम्भा ओरियन्टालिया,1685, मुद्रणम्।

ভট্টাচার্য্য,দীনেশচন্দ্র,*বাঙ্গালীর সারস্বত অবদান*(প্রথমভাগ),কলকাতাঃ বঙ্গীয় সাহিত্য পরিষৎ,১৪১৪(দ্বিতীয সংস্করণ) ১৩৫৮ চৈত্র(প্রথম সংস্করণ, মুদ্রিত ।

Dasgupta, Surendranath(ed.), *A History of Indian philosophy(in 5 Vols*), Dilhi: Motilal Banarsidass, 1975.

*****